॥ श्रीः ॥

हरिदास संस्कृत ग्रन्थमाला

२८१

श्रीमत्पाणिनिमुनिप्रणीतः

# धातुपाठः

धात्वर्थप्रकाशिकया टिप्पण्या समलङ्कृतः

टिप्पणीकारः

पण्डित श्रीकनकलालशर्मा

चौखम्बा संस्कृत सीरीज आफिस, वाराणसी-१

१९६९

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी
मुद्रक : विद्याविलास प्रेस, वाराणसी
संस्करण : द्वितीय, वि० संवत् २०२५
मूल्य : ०—७

© The Chowkhamba Sanskrit Series Office
Gopal Mandir Lane,
P. O. Chowkhamba, Post Box 8,
Varanasi-1 ( India )
1969
Phone : 3145

प्रधान शाखा
चौखम्बा विद्याभवन
चौक, पो० बा० ६६, वाराणसी-१
फोन : ३०७६

THE
HARIDAS SANSKRIT SERIES
281

THE

# DHĀTUPĀṬHA

OF

PĀṆINI

*With*

THE DHĀTVARTHA PRAKĀŚIKĀ NOTES

By
Pt. KANAKALĀL ŚARMĀ

THE
CHOWKHAMBA SANSKRIT SERIES OFFICE
VARANASI-1
1969

Second Edition

1969

Price Rs. 0-75

*Also can be had of*

THE CHOWKHAMBA VIDYABHAWAN

Publishers & Oriental Book-Sellers

Chowk, Post Box 69, Varanasi-1 ( India )

Phone : 3076

॥ श्रीरस्तु ॥

# अथ पाणिनीयो धातुपाठः

## भ्वादयः

१ भू सत्तायाम् । 'उदात्तः परस्मैभाषः' ॥
अथ षट्त्रिंशत्तवर्गीयान्ता आत्मनेपदिनः ।
२ एध वृद्धौ ।
३ स्पर्ध सङ्घर्षे ।
४ गाधृ प्रतिष्ठालिप्सयोर्ग्रन्थे च ।
५ बाधृ लोडने ।
६ नाथृ-
७ नाधृ याच्ञोपतापैश्वर्याशीःषु ।
८ दध धारणे ।
९ स्कुदि आप्रवणे ।
१० श्विदि श्वैत्ये ।

१ सत्ता—आत्मधारणानुकूलव्यापारः ।
२ वृद्धिः—वर्द्धनम् उपचयः ।
३ संघर्षः—पराभिभवेच्छा ।
४ प्रतिष्ठा—ख्यातिः-लिप्सा-लब्धुमिच्छा प्राप्त्यभिलाषा ।
५ लोडनम्—प्रतिघातः ।
६ याच्ञा—भिक्षा-उपतापो रोगः ।
९ आप्रवणम्—आप्लवनम्-उत्प्लवः । उद्धरणञ्च ।
१० श्वैत्यम्-श्वेतस्य भावः-शुक्लीभवनम् ।

११ वदि अभिवादनस्तुत्योः ।
१२ भदि कल्याणे सुखे च ।
१३ मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु ।
१४ स्पदि किञ्चिच्चलने ।
१५ क्लिदि परिदेवने ।
१६ मुद हर्षे ।
१७ दद दाने ।
१८ ष्वद-
१९ स्वर्द आस्वादने ।
२० उर्द माने क्रीडायां च ।
२१ कुर्द-
२२ खुर्द-
२३ गुर्द-
२४ गुद क्रीडायामेव ।

११ अभिवादनम्—नमस्कारः ।
१३ मोदः—सन्तोषः । मदो गर्वः । स्वप्न आलस्यम् । कान्तिरिच्छा ।
१४ किञ्चिच्चलनम्—मन्दगमनम् ।
१५ परिदेवनम्—शोकः ।
१७ दानम्—स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादनम् ।
१८-१९ आस्वादनम्—अनुभवः ।
२० मानम्—परिमाणम् ।

२५ षूद क्षरणे ।
२६ ह्राद अव्यक्ते शब्दे ।
२७ ह्रादी सुखे च ।
२८ स्वाद आस्वादने ।
२९ पर्द कुत्सिते शब्दे ।
३० यती प्रयत्ने ।
३१ युत्-
३२ द्युत् भासने ।
३३ विथ्-
३४ वेथ् याचने ।
३५ अथि शैथिल्ये ।
३६ ग्रथि कौटिल्ये ।
३७ कत्थ श्लाघायाम् ॥
'एधादय उदात्ता अनुदात्तेत आत्मनेभाषाः' अथार्धत्रिंशत्तवर्गीयान्ताः ॥
३८ अथ सातत्यगमनो ।
३९ चिती संज्ञाने ।

२५ क्षरणम्—प्रस्रवणम् ।
२६ अव्यक्तः—अस्फुटः ।
२९ कुत्सितः शब्दः गुदरवः ।
३० प्रयत्नः—उद्योगः ।
३२ भासनम्—दीप्तिः ।
३४ याचनम्—भिक्षा ।
३५ शैथिल्यम्—अवयवानां विभागः विशरणं च ।
३६ कौटिल्यं—कुटिलता, वक्रता ।
३७ श्लाघा—अविद्यमानगुणसम्बन्धज्ञापनम् ।
३८ सातत्यगमनम्—अनवरतचलनम् ।
३९ संज्ञानम्—सम्यक् ज्ञानम् बोधः ।

४० श्च्युतिर् आसेचने ।
४१ श्च्युतिर् ( श्चुतिर् ) क्षरणे ।
४२ मन्थ विलोडने ।
४३ कुथि-
४४ पुथि-
४५ लुथि-
४६ मथि हिंसासंक्लेशनयोः ।
४७ षिध गत्याम् ।
४८ षिधू शास्त्रे माङ्गल्ये च ।
४९ खाद भक्षणे ।
५० खद स्थैर्ये हिंसायां च ।
५१ बद स्थैर्ये ।
५२ गद व्यक्तायां वाचि ।
५३ रद विलेखने ।
५४ णद अव्यक्ते शब्दे ।
५५ अर्द गतौ याचने च ।
५६ नद-
५७ गर्द शब्दे ।
५८ तर्द हिंसायाम् ।
५९ कर्द कुत्सिते शब्दे ।
६० खर्द दन्दशूके ।
६१ अति-
६२ अदि बन्धने ।
६३ इदि परमैश्वर्ये ।
६४ बिदि अवयवे ॥
भिदि इत्येके ॥

६० दन्दशूकः—दन्दशूककर्तृकक्रिया ।
६४ अवयवः—एकदेशः ।

६५ गडि वदनैकदेशे ।
६६ णिदि कुत्सायाम् ।
६७ टुनदि समृद्धौ ।
६८ चदि आह्लादे दीप्तौ च ।
६९ त्रदि चेष्टायाम् ।
७० कदि-
७१ क्रदि-
७२ क्लदि आह्वाने रोदने च ।
७३ क्लिदि परिदेवने ।
७४ शुन्ध शुद्धौ ॥

'अतादय उदात्ता उदात्तेतः परस्मैभाषाः ॥
अथ कवर्गीयान्ताः आत्मनेपदिनः द्विचत्वारिंशत् ॥

७५ शीङ्क् सेचने ।
७६ लोक्ष दर्शने ।
७७ श्लोक्ष सङ्घाते ।
७८ ध्रेक्ष-
७९ ध्रेक्ष शब्दोत्साहयोः ।
८० रेक्ष शङ्कायाम् ।
८१ सेक्ष-
८२ सेक्ष-
८३ स्वकि-
८४ अकि-
८५ श्लकि गतौ ।
८६ शकि शङ्कायाम् ।
८७ अकि लक्ष्मणे ।
८८ वकि कौटिल्ये ।
८९ मकि मण्डने ।
९० कक लौल्ये ।
९१ कुक-
९२ वृक आदाने ।
९३ चक तृप्तौ प्रतिघाते च ।
९४ ककि-
९५ वकि-
९६ श्वकि-
९७ त्रकि-
९८ डौक्ष-
९९ त्रौक्ष-
१०० ष्वष्क-
१०१ वस्क-
१०२ मस्क-
१०३ टिक्ष-
१०४ टीक्ष-

६५ वदनैकदेशः—मुखावयवः (कपोलः) (गण्डस्थलम्)
६६ कुत्सा—निन्दा ।
६७ समृद्धिः—सम्यक् वर्द्धनम् ।
६८ आह्लादः—हर्षः । रोदनं-क्रन्दनम् ।
७२ आह्वानम्—आकारणम् ।
७३ परिदेवनम्—शोकः ।
७४ शुद्धिः—शौचकर्म ।
७५ सेचनम्—आर्द्रीकरणम् ।
७६ दर्शनम्—प्रेक्षणम् ।
७७ सङ्घातः—समूहः । समुदायः ।
(१) 'श्लोक्ष । इति पाठान्तरम् ।

८७ लक्षणम्—अङ्कनम्—(चिह्नम्) ।
८९ मण्डनम्—भूषणम् ।
९० लौल्यम्—गर्वः—चापल्यश्च ।
९२ आदानम्—ग्रहणम् ।
तृप्तिः—तर्पणम् ।
(१) 'स्वकि' । इति पाठान्तरम् ।

१०५ तिक्-
१०६ तीक्-
१०७ रघि-
१०८ लघि गत्यर्थाः ॥
तृतीयो दन्त्यादिरित्येके ॥
लघि भोजननिवृत्तावपि ॥
१०९ अघि-
११० वघि-
१११ मघि गत्याक्षेपे ।
गतौ गत्यारम्भे चेत्यपरे ।
मघि कैतवे च ॥
११२ राघृ-
११३ लाघृ-
११४ द्राघृ सामर्थ्ये ।
ध्राघृ इत्यपि केचित् ।
द्राघृ आयामे च ॥
११५ श्लाघृ कत्थने ॥
'शीकादय उदात्ता अनुदात्ता अनुदात्तेत आत्मनेभाषाः' ॥
अथ कवर्गीयान्ताः परस्मैपदिनः अष्टपञ्चाशत् ॥
११६ फक्क नीचैर्गतौ ।
११७ तक हसने ।

१११ गतिः—गत्यारम्भः । आक्षेपः—निन्दा ।
१११ कैतवम्—धौर्त्यम् ।
११४ सामर्थ्ये—पराक्रमः ।
११४ आयामः—दैर्घ्यम् ।।
११५ कत्थनम्—श्लाघा ।
११६ नीचगतिः—मन्दगमनम् ।

११८ तकि कृच्छ्रजीवने । ( शुक गतौ । )
११९ वुक्क भषणे ।
१२० कख हसने ।
१२१ ओखृ-
१२२ राखृ-
१२३ लाखृ-
१२४ द्राखृ-
१२५ ध्राखृ शोषणालमर्थयोः ।
१२६ शाखृ-
१२७ श्लाखृ व्याप्तौ ।
१२८ उख-
१२९ उखि-
१३० वख-
१३१ वखि-
१३२ मख-
१३३ मखि-
१३४ णख-
१३५ णखि-
१३६ रख-
१३७ राखि-
१३८ लख-
१३९ लखि-
१४० इख-
१४१ इखि-
१४२ ईखि-
१४३ वल्ग-
१४४ रगि -

११८ कृच्छ्रजीवनम् ।
( कम्पनम्—चलनम् )

१४५ लगि-
१४६ अगि-
१४७ वगि-
१४८ मगि-
१४९ तगि-
१५० त्वगि-
१५१ श्रगि-
१५२ श्लगि-
१५३ इगि-
१५४ रिगि-
१५५ लिगि गत्यर्थाः ॥
रिख ( रिखि लिख लिखि ) त्रख त्रिखि शिखि इत्यपि केचित् ।
त्वगि कम्पने च ॥
१५६ युगि-
१५७ जुगि-
१५८ वुगि वर्जने ।
१५९ घघ हसने । ( दघि पालने । लघि शोषणे । )
१६० मघि मण्डने ।
१६१ शिघि आघ्राणे । ( अर्घ मूल्ये ) । "फक्कादय उदात्तेतः परस्मैभाषाः" ॥
अथ चवर्गीयान्ताः आत्मनेपदिनः एकविंशतिः ॥

१५८ वर्जनम्—त्यागः ।
१६० मण्डनम्—भूषणम्-शोभाच ।
१६१ आघ्राणम्—गन्धोपादानम् ।

१६२ वर्च दीप्तौ ।
१६३ पच सेचने सेवने च ।
१६४ लोचृ दर्शने ।
१६५ शच व्यक्तायां वाचि ।
१६६ श्वच-
१६७ श्वचि गतौ । ( शचि च । )
१६८ कच बन्धने ।
१६९ कचि-
१७० काचि दीप्तिबन्धनयोः ।
१७१ मच-
१७२ लुचि कल्कने । कथन इत्यन्ये ॥
१७३ मचि धारणोच्छ्रायपूजनेषु ।
१७४ पचि व्यक्तीकरणे ।
१७५ प्रच प्रसादे ।
१७६ ऋज गतिस्थानार्जनोपार्जनेषु ।
१७७ ऋजि-
१७८ भृजी भर्जने ।

१६२ दीप्तिः—प्रकाशः ।
१६३ सेचनम्-आर्द्रीकरणम् । सेवनं शुश्रूषा ।
१६४ दर्शनम्—प्रेक्षणम् । ( अवलोकनम् ) ।
१६५ व्यक्ता वाक्—स्फुटा—वाणी ।
१६८ बन्धनम्—संयमनम् ।
१७२ कल्कनम्—दम्भः—शाठयं च ( कथनम् ) ।
१७३ धारणम्—ग्रहणम्—उच्छ्रायः उन्नतिः-पूजनम्—अर्चा ।
१७४ व्यक्तीकरणम्—स्फुटीकरणम् ।
१७५ प्रसादः—प्रसन्नता ।
१७८ भर्जनम्—जलं विना तण्डुलादेः सन्ता-पविशेषः ।

१७९ यज-
१८० भ्रेजृ-
१८१ भ्राजृ दीप्तौ ।
१८२ ईज गतिकुत्सनयोः ॥
'वर्चादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥
अथ चवर्गीयान्ता वृद्ध्यल्ताः परस्मैपदिनः द्विसप्ततिः ॥
१८३ शुच शोके ।
१८४ कुच शब्दे तारे ।
१८५ कुञ्च-
१८६ कुञ्च कौटिल्याल्पीभावयोः ।
१८७ लुञ्च अपनयने ।
१८८ अञ्चु गतिपूजनयोः ।
१८९ वञ्चु-
१९० चञ्चु-
१९१ तञ्चु-
१९२ त्वञ्चु-
१९३ म्रुञ्चु-
१९४ म्लुञ्चु-
१९५ म्रुचु-
१९६ म्लुचु गत्यर्थाः ।
१९७ म्रुचु-
१९८ म्लुचु-
१९९ कुजु-

१८२ कुत्सनम्—गर्हणम् ।
१८६ कौटिल्यं—कुटिलता अल्पीभावः-न्यूनीभवनम् ।
१८७ अपनयनं—दूरीकरणम् ।

२०० खुजु स्तेयकरणे ।
२०१ ग्लुञ्चु-
२०२ षस्ज गतौ । ( षस्जिरात्मनेपद्यपि ) ।
२०३ गुजि अव्यक्ते शब्दे ।
२०४ अर्च पूजायाम् ।
२०५ म्लेच्छ अव्यक्ते शब्दे ।
२०६ लछ-
२०७ लाछि लक्षणे ।
२०८ वाछि इच्छायाम् ।
२०९ आछि आयामे ।
२१० ह्रीछ लज्जायाम् ।
२११ हुर्छा कौटिल्ये ।
२१२ मुर्छा मोहसमुच्छ्राययोः ।
२१३ स्फुर्छा विस्तृतौ ।
२१४ युच्छ प्रमादे ।
२१५ उछि उञ्छे ।
२१६ उच्छी विवासे ।
२१७ व्रज-
२१८ भ्रजि-
२१९ धृज-

२०० स्तेयकरणम्—चौर्व्यापारः ।
२०७ लक्षणम्—चिह्नम् ।
२०९ आयामः—दैर्घ्यम् ।
२१० लज्जा—व्रीडा ।
२१२ मोहः—अविवेकः—समुच्छ्रायः, समुन्नतिः ।
२१३ विस्तृतिः—विस्तारः ।
२१४ प्रमादः—अनवधानता ।
२१५ उञ्छः कणश आदानम् ।
२१६ विवासः—समाप्तिः ।

२२० धृजि-
२२१ ध्वज-
२२२ ध्वजि गतौ। ( ध्रिज च )
२२३ कूज अव्यक्ते शब्दे।
२२४ अर्ज-
२२५ वर्ज अर्जने।
२२६ गर्ज शब्दे।
२२७ तर्ज भर्त्सने।
२२८ कर्ज व्यथने।
२२९ खर्ज पूजने च।
२३० अज गतिक्षेपणयोः।
२३१ तेज पालने।
२३२ खज मन्थे। ( कज मद इत्येके )।
२३३ खजि गतिवैकल्ये।
२३४ एजृ कम्पने।
२३५ टुओस्फूर्जा वज्रनिर्घोषे।
२३६ क्षि क्षये।
२३७ क्षीज अव्यक्ते शब्दे।
२३८ लज-
२३९ लजि भर्जने।
२४० लाज-
२४१ लाजि भर्त्सने च।
२४२ जज-
२४३ जजि युद्धे।
२४४ तुज हिंसायाम्।
२४५ तुजि पालने।
२४६ गज-
२४७ गजि-
२४८ गृज-
२४९ गृजि-
२५० तुज-
२५१ तुजि शब्दार्थाः। गज मदने च।
२५२ वज-
२५३ व्रज गतौ। भुवादय उदात्ता उदात्तेतः ( क्षिवर्ज ) परस्मैभाषाः॥ अथ टवर्गीयान्ताश्चाऽन्ताः आत्मनेपदिनः षट्त्रिंशत्॥
२५४ अट्ट अतिक्रमहिंसयोः।
२५५ वेष्ट वेष्टने।
२५६ चेष्ट चेष्टायाम्।
२५७ गोष्ट-
२५८ लोष्ट सङ्घाते।
२५९ घट्ट चलने।

---

२२७ भर्त्सनम्—अपकारः।
२२८ व्यथनम्—भयं—सञ्चलनञ्च।
२३२ मन्थ—विलोडनम्।
२३३ गतिवैकल्यम्—गमनविकलता।
२३५ वज्रनिर्घोषः—वज्रशब्दः।
२३६ क्षयः—नाशः। भर्जनम्—अस्यार्थ उक्तः।
२४४ हिंसा—प्राणवियोगानुकूलव्यापारः।
२४५ पालनं—रक्षणम्।
१५१ मदनम्—मदः—चित्तविकारः।
२५४ अतिक्रमः—जयः
२५५ वेष्टनम्—परिवेष्टनम्।
२५६ चेष्टा—शरीरव्यापारः।
२५७ सङ्घातः—समूहः।

२६० स्फुट विकसने ।
२६१ अठि गतौ ।
२६२ वठि एकचर्यायाम् ।
२६३ मठि-
२६४ कठि शोके ।
२६५ मठि पालने ।
२६६ हेठ विबाधायाम् ।
२६७ एठ च ।
२६८ हिडि गत्यनादरयोः ।
२६९ हुडि सङ्घाते ।
२७० कुडि दाहे ।
२७१ वडि विभाजने ।
२७२ मडि च ।
२७३ भडि परिभाषणे ।
२७४ पिडि सङ्घाते ।
२७५ मुडि मार्जने ।
२७६ तुडि तोडने ।
२७७ हुडि वरणे ॥ हरण इत्येके ॥
( स्फुडि विकसने )

२६० विकसनम्—अवयवविभागः ।
२६२ एकचर्या—सहायं विना चरणम् ।
२६३ शोकः—इह आध्यानम् ।
२६६ विबाधः—विशेषेण बाधा शाठ्यम् ।
२६८ अनादरः—तिरस्कारः ।
२७० दाहः—भस्मीकरणम् ।
२७१ विभाजनम्—विभागः ।
२७३ परिभाषणम्—परिहासः—सनिन्दोपालम्भश्च ।
२७५ मार्जनम्—शुद्धिर्न्यग्भावश्च ।
२७६ तोडनम्—प्रतिघातः ।
२७७ वरणम्—स्वीकारः ।

२७८ चडि कोपे ।
२७९ शडि रुजायां सङ्घाते च ।
२८० तडि ताडने ।
२८१ पडि गतौ ।
२८२ कडि मदे ।
२८३ खडि मन्थे ।
२८४ हेडृ-
२८५ होडृ अनादरे ।
२८६ बाडृ आप्लाव्ये ।
२८७ द्राडृ-
२८८ भ्राडृ विशरणे ।
२८९ शाडृ श्लाघायाम् ॥ अष्टादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ अथ टवर्गीयान्तसमाप्तेः परस्मैपदिनः पञ्चाशत् ॥
२९० शौटृ गर्वे ।
२९१ यौटृ बन्धे ।
२९२ म्लेटृ ।
२९३ म्रेडृ उन्मादे ।

२७९ रुजा—रोगः ।
२८० ताडनम्—आघातः ।
२८२ मदः—चित्तविकारः ।
२८३ मन्थः—विलोडनम् ।
२८४ अनादरः—परिभवः ।
२८६ आप्लाव्यम्—आप्लवः ( उत्प्लवः )
२८७ विशरणम्—अवयवविभागः ।
२८९ श्लाघा—आत्मप्रशंसा ।
२९० गर्वः—अभिमानः ।
२९२ उन्मादः—चित्तविकारः ।

२९४ कटे वर्षावरणयोः ॥ चटे इत्येके ॥
२९५ अत-
२९६ पट गतौ ।
२९७ रट परिभाषणे ।
२९८ लट वाल्ये ।
२९९ शट रुजाविशरणगत्यवसादनेषु ।
३०० वट वेष्टने ।
३०१ किट-
३०२ खिट त्रासे ।
३०३ शिट-
३०४ षिट अनादरे ।
३०५ जट-
३०६ झट सङ्घाते ।
३०७ भट भृतौ ।
३०८ तट उच्छ्राये ।
३०९ खट काङ्क्षायाम् ।
३१० नट नृत्तौ ।
३११ पिट शब्दसंघातयोः ।
३१२ हट दीप्तौ ।
३१३ षट अवयवे ।

२९४ आवरणम्—आच्छादनम् ।
२९७ परिभाषणम्—परिहासः—सनिन्दोपालम्भश्च ।
२९८ बाल्यम्—बालभावः—( शिशुत्वम् ) ।
२९९ रुजा-रोगः-विशरणम्-अवयव-विभागः । अवसादनम्—दुःखम् ।
३०१ त्रासः—भयम् ।
३०३ अनादरः—तिरस्कारः ।
३०७ भृतिः—भरणम् ।

३१४ लुट विलोडने । डान्तोऽयमित्येके ।
३१५ चिट परप्रेष्ये ।
३१६ विट शब्दे ।
३१७ बिट आक्रोशे । हिट इत्येके ॥
३१८ ईट-
३१९ किट-
३२० कटी गतौ ।
३२१ मडि भूषायाम् ।
३२२ कुडि वैकल्ये । कुटीत्येके ।
३२३ मुड-
३२४ प्रुड मर्दने ।
३२५ चुडि अल्पीभावे ।
३२६ मुडि खण्डने ॥ पुडि चेत्येके ॥
३२७ रुटि-
३२८ लुटि स्तेये ॥ रुठि लुठि इत्येके । रुडि-लुडि इत्यपरे ॥
३२९ स्फुटिर् विशरणे ॥ स्फुटि इत्यपि केचित् ॥
३३० पठ व्यक्तायां वाचि ।
३३१ वठ स्थौल्ये ।
३३२ मठ मदनिवासयोः ।

३१५ परप्रेष्यः—प्रेषणम् ।
३१७ आक्रोशः—विरुद्धानुध्यानम् ।
३२३ मर्दनम्—तोडनम् ।
३२६ खण्डनम्—छेदनम् ।
३३१ स्थौल्यम्—पुष्टता ।
३३२ मदः—चित्तविकारः ।

३३३ कठ कृच्छ्रजीवने ।
३३४ रट परिभाषणे । रठ इत्येके ।
३३५ हठ प्लुतिशठत्वयोः ॥ बला-
त्कार इत्यन्ये ॥
३३६ रुठ-
३३७ लुठ-
३३८ उठ उपघाते ॥ ऊठ इत्येके ।
३३९ पिठ हिंसासंक्लेशनयोः ।
३४० शठ कैतवे च ।
३४१ शुठ गतिप्रतिघाते ॥ शुठि-
इति स्वामी ।
३४२ कुठि च ।
३४३ लुठि आलस्ये प्रतिघाते च ।
३४४ शुठि शोषणे ।
३४५ रुठि-
३४६ लुठि गतौ ।
३४७ चुडु भावकरणे ।
३४८ अडु अभियोगे ।
३४९ कडु कार्कश्ये ॥ चुडुादय-
स्त्रयो दोपधाः ।
३५० क्रीडृ विहारे ।
३५१ तुडृ तोडने ॥ तूडृ इत्येके ॥
३५२ हुडृ-
३५३ हूडृ-

३३५ प्लुतिः—प्लवनम् । शठत्वं क्रौर्यम् ।
३४० कैतवम्—धौर्त्यम् ।
३४७ भावकरणम्—अभिप्रायसूचनम् ।
३४९ कार्कश्यम्—काठिन्यम् ।
३५१ तोडनम्—दारुणं हिंसनं च ।

३५४ होडृ गतौ ।
३५५ रौडृ अनादरे ।
३५६ रोडृ-
३५७ लोडृ उन्मादे ।
३५८ अड उद्यमे ।
३५९ लड विलासे ॥ लल इत्येके ॥
३६० कड मदे ॥ कडि इत्येके ॥
३६१ गडिवदनैकदेशे ॥ शौट्ङ्गादय
उदात्ता उदात्तेतः परस्मै-
भाषाः ॥ अथ पदवीयान्ता
आत्मनेपदिनः स्तोभत्यन्ता-
श्चतुस्त्रिंशत् ॥
३६२ तिपृ-
३६३ तेपृ-
३६४ ष्टिपृ-
३६५ ष्टेपृ क्षरणार्थाः ॥ आद्योऽनु-
दात्तः ॥ तेपृ कम्पने च ॥
३६६ ग्लेपृ दैन्ये ।
३६७ टुवेपृ कम्पने ।
३६८ केपृ-
३६९ गेपृ-
३७० ग्लेपृ च ।
३७१ मेपृ-

३५६ उन्मादः—चित्तविभ्रमः ।
३५८ उद्यमः—उद्योगः ।
३५९ विलासः—क्रीडा ।
३६० मदः—दर्पः ।
३६६ दैन्यम्—खेदः ।

३७२ रेपृ-
३७३ लेपृ गतौ ।
३७४ त्रपूष् लज्जायाम् ।
३७५ कपि चलने ।
३७६ रबि-
३७७ लबि-
३७८ अबि शब्दे ।
३७९ लबि अवस्रंसने च ।
३८० कवृ वर्णे ।
३८१ क्षीवृ अधाष्ट्र्ये ।
३८२ क्षीवृ मदे ।
३८३ शीभृ कत्थने ।
३८४ चीभृ च ।
३८५ रेभृ शब्दे ॥ अभिरभी कचित्पठ्येते ॥ लभि च ।
३८६ ष्ठभि-
३८७ स्कभि प्रतिबन्धे ।
३८८ जभी-
३८९ जृभि गात्रविनामे ।
३९० शल्भ कत्थने ।
३९१ वल्भ भोजने ।
३९२ गल्भ धाष्ट्र्ये ।
३९३ श्रम्भु प्रमादे ॥ दन्त्यादिश्च ।

३७९ अवस्रंसनम्—अधः पतनम् ।
३८१ अधाष्ट्र्यम्—अधृष्टता (अप्रगल्भता) ।
३८३ कत्थनम्—श्लाघा ।
३८७ प्रतिबन्धः—अवरोधः ।
३८८ गात्रविनामः—तन्द्रया मुखव्यादानम् ।
३९२ धाष्ट्र्यम्—धृष्टता ।

३९४ ष्टुभु स्तम्भे ॥ तिप्यादय उदात्ता अनुदात्तेत आत्मनेभाषाः ॥ तिपिस्त्वनुदात्तः ॥ अथ पवर्गीयान्ताः परस्मैपदिनः एकचत्वारिंशत् ॥
३९५ गुपू रक्षणे ।
३९६ धूप सन्तापे ।
३९७ जप-
३९८ जल्प व्यक्तायां वाचि ।
जप मानसे च ॥
३९९ चप सान्त्वने ।
४०० षप समवाये ।
४०१ रप-
४०२ लप व्यक्तायां वाचि ।
४०३ क्षुप मन्दायां गतौ ।
४०४ तुप-
४०५ तुम्प-
४०६ क्षुप-
४०७ क्षुम्प-
४०८ तुफ-
४०९ तुम्फ-
४१० क्षुफ-
४११ क्षुम्फ हिंसार्थाः ।
४१२ पर्प-
४१३ रफ-
४१४ रफि-
४१५ अर्ब-

३९६ सन्तापः—दुःखम् ।
३९९ सान्त्वनम्—शान्तिः ।
४०० समवायः—सम्बन्धः । (सम्यगवबोधो वा)

४१६ पर्व-
४१७ लर्व-
४१८ बर्व-
४१९ मर्व-
४२० कर्व-
४२१ खर्व-
४२२ गर्व-
४२३ शर्द-
४२४ षर्व
४२५ । चर्व गतौ ।
४२६ कुबि आच्छादने ।
४२७ लुबि-
४२८ तुबि अर्दने ।
४२९ चुबि वक्त्रसंयोगे ।
४३० षृभु-
४३१ षृम्भु हिंसार्थौ । षिभु षिम्भु इत्येके ॥
४३२ शुभ-
४३३ शुम्भ भाषणे । भासन इत्येके ॥ हिंसायामित्यन्ये ॥ गुपादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ अथ अनुनासिकान्ताः कम्यन्ताः आत्मनेपदिनो दश ॥
४३४ घिणि-
४३५ घुणि-
४३६ घृणि ग्रहणे ।

४३७ घुण-
४३८ घूर्ण भ्रमणे ।
४३९ पण व्यवहारे स्तुतौ च ।
४४० पन च ।
४४१ भाम क्रोधे ।
४४२ क्षमूष् सहने ।
४४३ कमु कान्तौ ॥ घिण्यादय उदात्ता अनुदात्तेतः आत्मनेभाषाः ॥ अथ क्रम्यन्ताः परस्मैपदिनः त्रिंशत् ॥
४४४ अण-
४४५ रण-
४४६ वण-
४४७ मण-
४४८ मण-
४४९ कण-
४५० क्वण-
४५१ व्रण-
३५२ भ्रण-
४५३ ध्वण शब्दार्थाः ॥ धण इत्यपि केचित् ॥
४५४ ओणृ अपनयने ।
४५५ शोणृ वर्णगत्योः ।
४५६ श्रोणृ सङ्घाते ।
४५७ श्लोणृ च ।
४५८ पैणृ गतिप्रेरण-श्लेषणेषु । (प्रैणृ इत्यपि) ।

४२६ आच्छादनम्--आवरणम् ।
४२७ अर्दनम्--पीडनम् ।
४२९ वक्त्रसंयोगः--चुम्बनम् ।

४३७ भ्रमणम्--इतस्ततश्चलनम् ।
४५४ अपनयनम्--दूरीकरणम् ।
४५८ प्रेरणम्--प्रेषणं । श्लेषणं सम्बन्धः ।

४५९ भ्रन शब्दे। बण इत्यपि केचित् ॥
४६० कनी दीप्तिकान्तिगतिषु।
४६१ ष्टन-
४६२ वन शब्दे।
४६३ वन-
४६४ षण सम्भक्तौ।
४६५ अम गत्यादिषु।
४६६ द्रम-
४६७ हम्म-
४६८ मीमृ गतौ। मीमृ शब्दे च ॥
४६९ चमु-
४७० छमु-
४७१ जमु-
४७२ झमु अदने जिमु इति केचित्।
४७३ क्रमु पादविक्षेपे ॥ अणादय उदात्ता उदात्तेतः परस्मैभाषाः ॥ अथ रेवत्यन्ता आत्मनेपदिनश्चत्वारिंशत् ॥
४७४ अय-
४७५ वय-
४७६ पय-
४७७ मय-
४७८ चय-
४७९ तय-
४८० णय गतौ।

४६४ सम्भक्तिः--सम्यक्सेवनम्।
४७१ अदनम्--भक्षणम्।
४७३ पादविक्षेपः--चरणसञ्चालनम्।

४८१ दय दानगतिरक्षणहिंसादानेषु।
४८२ रय गतौ। लय च ॥
४८३ ऊयी तन्तुसन्ताने।
४८४ पूयी विशरणे दुर्गन्धे च।
४८५ कनूयी शब्दे उन्दे च।
४८६ क्ष्मायी विधूनने।
४८७ स्फायी-
४८८ ओप्यायी वृद्धौ।
४८९ तायृ सन्तानपालनयोः।
४९० शल चलनसंवरणयोः।
४९१ वल-
४९२ वल्ल संवरणे सञ्चरणे च।
४९३ मल-
४९४ मल्ल धारणे।
४९५ भल-
४९६ भल्ल परिभाषणहिंसादानेषु।
४९७ कल शब्दसङ्ख्यानयोः।
४९८ वल्ल अव्यक्ते शब्दे। अशब्द इति स्वामी ॥
४९९ तेवृ-
५०० देवृ देवने।
५०१ षेवृ-

४८३ तन्तुसन्तानम्--तन्तुविस्तारः।
४८४ विशरणम्--अवयवविभागः।
४८५ उन्दः--क्लेदनम्।
४८६ विधूनम्--कम्पनम्।
४९७ संख्यानम्--परिगणनम्।
४९८ अशब्दः--तूष्णीम्भावः।
४९९ देवनम्--दुःखम्।

५०२ गेवृ-
५०३ ग्लेवृ-
५०४ पेवृ-
५०५ मेवृ-
५०६ म्लेवृ सेवने ॥ शेवृ खेवृ क्लेवृ इत्येके ॥
५०७ रेवृ प्लवगतौ ॥ अयादय उदात्ता अनुदात्तेत आत्मनेभाषाः अथावत्यन्ताः परस्मैपदिनः एकनवतिः ॥
५०८ मव्य बन्धने ।
५०९ सूर्ख्य-
५१० ईर्ख्य-
५११ ईर्ष्य ईर्ष्यार्थाः ।
५१२ हय गतौ ।
५१३ शुच्य अभिषवे । चुच्य इत्येके ॥
५१४ हर्य गतिकान्त्योः ।
५१५ अल भूषणपर्याप्तिवारणेषु ॥ अयं स्वरितेदित्येके ॥
५१६ अिफला विशरणे ।
५१७ मील-
५१८ श्मील-

५१३ अभिषवः-क्षपनं स्नानं सुरासन्धानञ्च ।
५१५ भूषणम्--अलङ्करणम् । पर्याप्तिः । पूर्णता--वारणं । निषेधः ।
५१६ विशरणम्--अवयवविभागः ।
५१७ निमेषणम्--सङ्कोचः ।

५१९ स्मील-
५२० क्ष्मील निमेषणे ।
५२१ पील प्रतिष्टम्भे ।
५२२ नील वर्णे ।
५२३ शील समाधौ ।
५२४ कील बन्धने ।
५२५ कूल आवरणे ।
५२६ शूल रुजायां सङ्क्लोषे च ।
५२७ तूल निष्कर्षे ।
५२८ पूल सङ्घाते ।
५२९ मूल प्रतिष्ठायाम् ।
५३० फल निष्पत्तौ ।
५३१ चुल्ल भावकरणे ।
५३२ फुल्ल विकसने ।
५३३ चिल्ल शैथिल्ये भावकरणे च ।
५३४ तिल गतौ । तिल्ल इत्येके ॥
५३५ वेलृ-
५३६ चेलृ-
५३७ केलृ-
५३८ खेलृ-
५३९ क्ष्वेलृ-

५२१ प्रतिष्टम्भः—अवरोधः । निरोधः ।
५२३ समाधिः--चित्तवृत्तिनिरोधः ।
५२५ आवरणम्--आच्छादनम् ।
५२६ रुजा--रोगः ।
५२७ निष्कर्षः--निष्कोषणं । तच्चान्तर्गतस्य बहिर्निःसारणम् ।
५३० निष्पत्तिः--पूर्णता--सिद्धिः ।
५३१ भावकरणम्--अभिप्रायसूचनम् ।

५४० वेल्ल चलने।
५४१ पेल्ल।
५४२ फेल्ल।
५४३ शेल्ल गतौ। केल्ल इत्येके।
५४४ स्खल सञ्चलने।
५४५ खल सञ्चये।
५४६ गल अदने।
५४७ पल गतौ।
५४८ दल विशरणे।
५४९ प्वल।
५५० प्वल्ल आशुगमने।
५५१ खोल्ल।
५५२ खोर्क्ष गतिप्रतिघाते।
५५३ धार्क्ष गतिचातुर्ये।
५५४ त्सर छद्मगतौ।
५५५ कमर हूर्च्छने।
५५६ अभ्र-
५५७ वभ्र-
५५८ मभ्र-
५५९ चर गत्यर्थाः। चरतिर्भक्षणेऽपि॥
५६० ष्टिवु निरसने।
५६१ जि जये।

५४५ सञ्चयः—सङ्ग्रहः—एकत्रीकरणम्।
५४९ आशुगमनम्—शीघ्रगतिः।
५५२ गतिप्रतिघातः—गमननिरोधः।
५५३ गतिचातुर्यम्—गमननैपुण्यम्।
५५४ छद्मगतिः—कपटगमनम्।
५५५ हूर्च्छनम्—कौटिल्यम्।
५६० निरसनम्—थुतीकरणम्।

५६२ जीव प्राणधारणे।
५६३। पीव-
५६४ मीव-
५६५ तीव-
५६६ णीव स्थौल्ये।
५६७ क्षीवु-
५६८ क्ष्वेडु निरसने।
५६९ उर्वी-
५७० तुर्वी-
५७१ थुर्वी-
५७२ दुर्वी-
५७३ धुर्वी हिंसार्थाः।
५७४ गुर्वी उद्यमने।
४७५ मुर्वी बन्धने।
५७६ पूर्व-
५७७ पर्व-
५७८ मर्व पूरणे।
५७९ चर्व अदने।
५८० भर्व हिंसायाम्।
५८१ कर्व-
५८२ खर्व-
५८३ गर्व दर्पे।

५६२ प्राणधारणम्—जीवनम्।
३६३ स्थौल्यम्—पीवरत्वम्।
५६७ निरसनम्—थुतीकरणम्।
५७४ उद्यमनम्—उद्योगः।
५७५ बन्धनम्—निरोधः।
५७६ पूरणम्—तृप्तिः।
५७९ अदनम्—चर्वणम्।
५८१ दर्पः—अहङ्कारः।

५८४ अर्व ।
५८५ शर्व ।
५८६ पर्व हिंसायाम् ।
५८७ इवि व्याप्तौ ।
५८८ पिवि ।
५८९ मिवि ।
५९० णिवि सेचने । (षवीत्येके) । सेवन इति तरङ्गिण्याम् ।
५९१ हिवि ।
५९२ दिवि ।
५९३ धिवि ।
५९४ जिवि प्रीणनार्थाः ।
५९५ रिवि ।
५९६ रवि ।
५९७ धवि गत्यर्थाः ।
५९८ कुवि हिंसाकरणयोश्च ।
५९९ मव बन्धने ।
६०० अव रक्षणगतिकान्तिप्रीतितृप्त्यवगमप्रवेशश्रद्दणस्वाम्यर्थयाचनक्रियेच्छादीप्त्यवाप्त्यालिङ्गनहिंसादानभागवृद्धिषु । मव्यादय उदात्ता उदात्तेतः परस्मैभाषाः । जिस्त्वनुदात्तः ।
६०१ धावु गतिशुध्योः । उदात्तः स्वरितेदुभयतोभाषः । अथोष्मान्ता आत्मनेपदिनो द्विपञ्चाशत् ।
६०२ धुक्ष ।
६०३ धिक्ष संदीपनक्लेशनजीवनेषु ।
६०४ वृक्ष वरणे ।
६०५ शिक्ष विद्योपादाने ।
६०६ भिक्ष भिक्षायामलाभे लाभे च ।
६०७ क्लेश अव्यक्तायां वाचि । बाधन इति दुर्गः ।
६०८ दक्ष वृद्धौ शीघ्रार्थे च ।
६०९ दीक्ष मौण्डयेज्योपनयननियमव्रतादेशेषु ।

५८७ व्याप्तिः—व्यापनम् ।
५८८ सेचनम्—आर्द्रीभवनम् ।
५९४ प्रीणनम्—जीवनम् ।
६०० अवगमः—ज्ञानम् ।
अवाप्तिः—प्राप्तिः ।
आलिङ्गनम्—मिलनम् ।
भागः—विभागः ।

६०१ शुद्धिः—पवित्रता ।
६०२ सन्दीपनम्—ज्वलनम् ।
क्लेशनम्—क्लेशः ।
जीवनम्—प्राणधारणम् ।
६०४ वरणम्—स्वीकारः ।
६०५ विद्योपादानम्—विद्याग्रहणम् ।
६०६ अलाभः—अप्राप्तिः ।
लाभः—प्राप्तिः ।
६०९ मौण्ड्यम्—केशवपनम् ।
इज्या—यागः
उपनयनम्—व्रतबन्धः ।
नियमः—संयमः ।

६१० ईक्ष दर्शने ।
६११ ईष गतिहिंसादर्शनेषु ।
६१२ भाष व्यक्तायां वाचि ।
६१३ वर्ष स्नेहने ।
६१४ गेषृ अन्विच्छायाम् । ग्लेषृ इत्येके ।
६१५ पेषृ प्रयत्नेन । ( एषृ इत्येके येषृ इत्यप्यन्ये ) ।
६१६ जेषृ ।
६१७ णेषृ-
६१८ एषृ-
६१९ प्रेषृ गतौ ।
६२० रेषृ-
६२१ ह्रेषृ-
६२२ ह्रेषृ अव्यक्ते शब्दे ।
६२३ कासृ शब्दकुत्सायाम् ।
६२४ भासृ दीप्तौ ।
६२५ णासृ-
६२६ रासृ शब्दे ।
६२७ णस कौटिल्ये ।
६२८ भ्यस भये ।
६२९ आङः शसि इच्छायाम् ।
६३० ग्रसु ।
६३१ ग्लसु अदने ।
६३२ ईह चेष्टायाम् ।

६३३ वहि-
६३४ महि वृद्धौ । ( वहित्येके )
६३५ अहि गतौ ।
६३६ गर्ह-
६३७ गल्ह कुत्सायाम् ।
६३८ बर्ह-
६३९ बल्ह प्राधान्ये ।
६४० वर्ह-
६४१ वल्ह परिभाषणहिंसाच्छादनेषु ।
६४२ प्लिह गतौ ।
६४३ वेह्ह ( वेह ) ।
६४४ जह्ह-
६४५ वाह्ह ( वाह ) प्रयत्ने । जेह्ह गतावपि ।
६४६ द्राह्ह निद्राक्षये । निक्षेप इत्येके ।
६४७ काश्ट दीप्तौ
६४८ ऊह वितर्के ।
६४९ गाह्ह विलोडने ।
६५० गृह्ह ग्रहणे-
६५१ ग्लह च ।
६५२ घुषि कान्तिकरणे । घष इति केचित् । धुक्षादय उदात्ता अनुदात्तेत आत्मनेभाषाः । गृहिस्तु वेट् ।

---

व्रतम्–उपवासः ।
आदेशः–आज्ञा–(निदेशः)
६१३ स्नेहनम्—चिक्कणम् ।
६१४ अन्विच्छा—अन्वेषणम् ।

६४० परिभाषणम्–अनृतभाषणम् । आच्छादनम्–आवरणम् ।
६४६ निद्राक्षयः–निद्राभङ्गः ( जागरणम् ) ।
६४८ वितर्कः–विचारः ।
६४९ विलोडनम्–प्रतीघातः ।

अथ अर्हत्यन्ताः परस्मैपदिन एकनवतिः ।

६५३ घुषिर् अविशब्दने । शब्द इति अन्ये पेठुः ।
६५४ अक्षू व्याप्तौ ।
६५५ तक्षू-
६५६ त्वक्षू तनूकरणे ।
६५७ उक्ष सेचने ।
६५८ रक्ष पालने ।
६५९ णिक्ष चुम्बने ।
६६० त्रक्ष-
६६१ ष्ट्रक्ष ( तृक्ष ष्टृक्ष )-
६६२ णक्ष गतौ ।
६६३ वक्ष रोषे । संघात इत्येके ।
६६४ मृक्ष संघाते । म्रक्ष इत्येके ।
६६५ तक्ष त्वचने । पक्ष परिग्रह इत्येके ।
६६६ सूर्क्ष आदरे । षर्क्ष इति केचित् ।
६६७ काक्षि-
६६८ वाक्षि-
६६९ माक्षि काङ्क्षायाम् ।
६७० द्राक्षि-
६७१ ध्राक्षि-
६७२ ध्वाक्षि घोरवासिते च ।
६७३ चूष पाने ।
६७४ तूष तुष्टौ ।
६७५ पूष वृद्धौ ।
६७६ मूष स्तेये ।
६७७ लूष-
६७८ रूष भूषायाम् ।
६७९ शूष प्रसवे ।
६८० यूष हिंसायाम्-
६८१ जूष च ।
६८२ भूष अलङ्कारे ।
६८३ ऊष रुजायाम् ।
६८४ इष उञ्छे ।
६८५ कष-
६८६ खष-
६८७ शिष-
६८८ जष-
६८९ झष-
६९० शष-
६९१ वष-
६९२ मष-
६९३ रुष-
६९४ रिष हिंसार्थाः ।
६९५ भष भर्त्सने ।
६९६ उष दाहे ।

६५३ अविशब्दनम्—अप्रतिज्ञानम् ।
६५५ तनूकरणम्—तीक्ष्णीकरणम् ।
६६५ त्वचनम्—संवरणम्—त्वचोग्रहणञ्च ।
६६६ आदरः—सत्कारः ।
६६७ काङ्क्षा—इच्छा ।
७० घोरवासितम्—घोरशब्दः ।
६७९ प्रसवः—अभ्यनुज्ञानम् ।
६८३ रुजा—पीडा ।
६८४ उञ्छः—कणश आदानं कणिशाद्यर्जनं शिलम् ।
६९५ भर्त्सनम्—इवरवः ।

६९७ जिषु-
६९८ विषु-
६९९ मिषु सेचने ।
७०० पुष पुष्टौ ।
७०१ श्रिषु-
७०२ स्रिषु-
७०३ प्रुषु-
७०४ प्लुषु दाहे ।
७०५ पृषु-
७०६ वृषु-
७०७ मृषु सेचने । मृषु सहने च । इतरौ हिंसासंक्लेशनयोश्च ।
७०८ घृषु सङ्घर्षे ।
७०९ हृषु अलीके ।
७१० तुस-
७११ हृस-
७१२ ह्लस-
७१३ रस शब्दे ।
७१४ लस श्लेषणक्रीडनयोः ।
७१५ घस्लृ अदने ।
७१६ जर्ज-
७१७ चर्च-

७०४ दाहः—भस्मीकरणम् ।
७०५ सेचनम्—आर्द्रीकरणम् । सहनम्—मर्षणम् ।
७०८ सङ्घर्षः—परामिभवेच्छा ।
७०९ अलीकम्—मिथ्याभाषणम् ।
७१४ श्लेषणम्—आलिङ्गनम् ।
७१६ परिभाषणम्—अनृतभाषणम् । तर्जनम्—भर्त्सनम् ।

७१८ झर्झ परिभाषणहिंसातर्जनेषु ।
७१९ पिस्-
७२० पेस् गतौ ।
७२१ हसे हसने ।
७२२ णिश समाधौ ।
७२३ मिश-
७२४ मश शब्दे रोषकृते च ।
७२५ शव गतौ-
७२६ शश प्लुतगतौ ।
७२७ शसु हिंसायाम् ।
७२८ शंसु स्तुतौ । दुर्गताविति दुर्गः ।
७२९ चह परिकल्कने ।
७३० मह पूजायाम् ।
७३१ रह त्यागे ।
७३२ रहि गतौ ।
७३३ दह-
७३४ दहि-
७३५ बृह-
७३६ बृहि वृद्धौ बृहि शब्दे च । बृहिर् चेत्यके ।
७३७ तुहिर्-
७३८ दुहिर्
७३९ उहिर् अर्दने ।
७४० अर्ह पूजायाम् । घुषिरा-

७२२ समाधिः—चित्तवृत्तिनिरोधः ।
७२६ प्लुतगतिः—उत्प्लुत्यगमनम् ।
७२९ परिकल्कनम्—दम्भः शाठ्यं च ।
७३७ अर्दनम्—पीडनम् ।

दय उदात्ता उदात्तेतः परस्मैभाषाः। घसिस्त्वनुदात्तः। अथ कृपूपर्यन्ता अत्मनेपदिनष्षड्विंशतिः।

७४१ द्युत दीप्तौ।
७४२ श्विता वर्णे।
७४३ ञिमिदा स्नेहने।
७४४ ञिष्विदा स्नेहनमोचनयोः। मोहनयोरित्येके। ञिक्ष्विदा चेत्येके।
७४५ रुच दीप्तावभिप्रीतौ च।
७४६ घुट परिवर्तने।
७४७ रुट-
७४८ लुट-
७४९ लुठ प्रतिघाते।
७५० शुभ दीप्तौ।
७५१ क्षुभ सञ्चलने।
४५२ णभ-
७५३ तुभ हिंसायाम्। आद्योऽभावेऽपि।
७५४ स्रंसु-
७५५ ध्वंसु-

७४१ दीप्तिः–प्रकाशः।
७४४ स्नेहनम्—चिक्कणम्। मोचनम्—त्यागः। मोहनम्—वशीकरणम्।
७४५ अभिप्रीतिः–अभिलाषः।
७४६ परिवर्तनम्–सञ्चालनम्।
७५४ अवस्रंसनम्–अधःपतनम्।

७५६ भ्रंसु अवस्रंसने। ध्वंसु गतौ च। भ्रंशु इत्यपि केचित्। तृतीय एव तालव्यान्त इत्यन्ये।
७५७ स्रंभु विश्वासे।
७५८ वृतु वर्तने।
७५९ वृधु वृद्धौ।
७६० शृधु शब्दकुत्सायाम्।
७६१ स्यन्दू प्रस्रवणे।
७६२ कृपू सामर्थ्ये। द्युतादय उदात्ता अनुदात्तेतः आत्मनेभाषा। वृत्। अथ त्वरत्यन्ताः त्रयोदशात्मनेपदिनः षितश्च।
७६३ घट चेष्टायाम्।
७६४ व्यथ भयसञ्चलनयोः।
७६५ प्रथ प्रख्याने।
७६६ प्रस विस्तारे।
७६७ म्रद मर्दने।
७६८ स्खद स्खदने।
७६९ क्षजि गतिदानयोः।
७७० दक्ष गतिहिंसनयोः।
७७१ क्रप कृपायां गतौ च।

७५७ विश्वासः—विस्रम्भः।
७५८ वर्तनम्–स्थितिः।
७६१ प्रस्रवणम्—निस्यन्दनम्।
७६२ सामर्थ्यम्–पराक्रमः।
६६३ चेष्टा—व्यापारः।
७६५ प्रख्याजम्—प्रसिद्धिः।
७६७ मर्दनम्—पीडनम्।
७६८ स्खदनम्—विद्रावणम्।

७७२ कदि-
७७३ क्रदि-
७७४ क्लदि वैकल्य इत्येके। त्रयोऽप्यनिदितइति नन्दी। इदित इतिस्वामी कदिक्रदी इदितौ क्रद क्लद इति चानिदितौ इति मैत्रेयः।
७७५ त्वरा सम्भ्रमे। घटादयः षितः। उदात्ता अनुदात्तेत आत्मनेभाषाः। अथ फणान्ताः परस्मैपदिनः।
७७६ ज्वर रोगे।
७७७ गड सेचने।
७७८ हेड वेष्टने।
७७९ वट-
७८० भट परिभाषणे।
७८१ णट नृत्तौ। नतावित्येके। गतावित्यन्ये।
७८२ षृक प्रतिघाते।
७८३ चक तृप्तौ।
७८४ कखे हसने।
७८५ रगे शङ्कायाम्।
७८६ लगे सङ्गे।
७८७ ह्वगे-
७८८ ह्लगे-
७८९ षगे-
७९० ष्टगे संवरणे।
७९१ कगे नोच्यते।
७९२ अक-
७९३ अग कुटिलायां गतौ।
७९४ कण-
७९५ रण गतौ।
७९६ चण-
७९७ शण-
७९८ श्रण दाने च। शण गतावित्यन्ये।
७९९ श्रथ (श्रथ श्लथ)
८०० क्रथ-
८०१ क्रथ-
८०२ क्लथ हिंसार्थाः।
८०३ वन च। वनु च नोच्यते।
८०४ ज्वल दीप्तौ।
८०५ ह्वल-
८०६ ह्वल चलने।
८०७ स्मृ आध्याने।
८०८ दृ भये।
८०९ नृ नये।
८१० श्रा पाके। मारणतोषणनिशामनेषु।

---

७७२ वैक्लव्यम्- विकलता।
७७५ सम्भ्रमः-शीघ्रता।
७७६ रोगः—व्याधिः।
७७७ सेचनम्-आर्द्रीकरणम्।
७७८ वेष्टनम्-परिवेष्टनम्।
७७९ परिभाषणम्—श्वरवः।
७८७ संवरणम्—स्वीकारः।
७९२ कुटिलगतिः-क्रूरगमनम्।
८०७ अध्यानम्-उत्कण्ठापूर्वकम्।
८०९ नयः—प्रापणम्।
८१० मारणम्—हिंसा।
तोषणम्-तुष्टिः।

८११ ज्ञा । निशानेष्विति पाठान्तरम् ।
८१२ चलिः कम्पने ।
८१३ छदिर् ऊर्जने ।
८१४ लडिः जिह्वोन्मथने ।
८१५ मदी हर्षग्लेपनयोः ।
८१६ ध्वन शब्दे । दलि-वलि-स्खलि-रणि-ध्वनि-त्रपि-क्षपयश्चेति भोजः ।
८१७ स्वन अवतंसने । घटादयो मितः । जनी-जृष्-क्नसु-रञ्जो-ऽमन्ताश्च । ज्वल-ह्वल-ह्मल-नमामनुपसर्गाद्वा । ग्ला-ह्वा-वनु-वमां च । न कमि-अमि-चमाम् ।
८१८ शमो दर्शने ।
८१९ यमोऽपरिवेषणे ।
८२० स्वदिर् अवपरिभ्यां च ।
८२१ फण गतौ । घटादयः फणान्ता मितः । वृत् । ज्वरादय उदात्ता उदात्तेतः परस्मैभाषाः ।

निशामनम्— तीक्ष्णीकरणम् ।
८१३ ऊर्जनम्—बलम् ।
८१४ जिह्वोन्मथम्—जिह्वया शापनम् ।
८१५ ग्लेपनम्—दैन्यम् ।
८१९ अपरिवेषणम्-अभोजनम् ।

८२२ राजृ दीप्तौ । उदात्तः स्वरितेदुभयतो भाषाः ।
८२३ टुभ्राजृ-
८२४ टुभ्राशृ-
८२५ टुभ्लाश्रृ दीप्तौ । उदात्ता अनुदात्तेतः आत्मनेभाषाः । अथ क्षरत्यन्ताः परस्मैपदिनः ।
८२६ स्युमु-
८२७ स्वन-
८२८ ध्वन शब्दे । फणादयो गताः ।
८२९ षम-
८३० ष्टम अवैकल्ये । वृत् ।
८३१ ज्वल दीप्तौ ।
८३२ चल कम्पने ।
८३३ जल घातने ।
८३४ टल-
८३५ ट्वल वैक्लव्ये ।
८३६ ष्ठल स्थाने ।
८३७ हल विलेखने ।
८३८ णल गन्धे । बन्धन इत्येके ।
८३९ पल गतौ ।

८२२ दीप्तिः—शोभा ।
८२९ अवैकल्यम्—अविकलता ।
५३२ कम्पनम्—विधूननम् ।
८३३ घातनम्—तैक्ष्ण्यम् ।
८३४ वैक्लव्यम्—भयजनितोद्विग्नता ।
८३६ स्थानम्—उपवेशनाधिकरणम् ।
८३७ विलेखनम्—आकर्षणम् ।

८४० बल प्राणने धान्यावरो धने च ।
८४१ पुल महत्त्वे ।
८४२ कुल संस्त्याने बन्धुषु च ।
८४३ शल-
८४४ हुल-
८४५ पल्ल गतौ । ( हुल हिंसायां संवरणे च ) ।
८४६ क्वथे निष्पाके ।
८४७ पथे गतौ ।
८४८ मथे विलोडने ।
८४९ टुवम् उद्गिरणे ।
८५० भ्रमु चलने ।
८५१ क्षर सञ्चलने । स्यामादय उदात्तेतः परस्मैभाषाः ।
८५२ षह मर्षणे । उदात्तोऽनुदात्तेदात्मनेभाषाः ।
८५३ रमु क्रीडायाम् । रम ईति माधवः । अनुदात्तोऽनुदात्तेदात्मनेभाषः । अथ कसन्ताः परस्मैपदिनः ।

८४० प्राणनम्–जीवधारणम् ।
८४१ महत्त्वम्—उत्कृष्टता ।
८४२ संस्त्यानम्–सङ्घातः । बन्धुः–बन्धुतानुकूल्यापारः ।
८४६ निष्पाकः–नितरां पाचनम् ।
८४८ विलोडनम्—प्रतीघातः ।
८४९ उद्गिरणम्—उद्गमनम् ।
८५२ मर्षणम्—क्षमाऽभिभवश्च ।
८५३ क्रीडा—विहारः ।

८५४ षदॢ विशरणगत्यवसादनेषु ।
८५५ शदॢ शातने ।
८५६ क्रुश आह्वाने रोदने च । षदादयस्त्रयोऽनुदात्ता उदात्तेतः परस्मैषाः ।
८५७ कुच सम्पर्चनकौटिल्यप्रतिष्टम्भविलेखनेषु ।
८५८ वुध अवगमने ।
८५९ रुह बीजजन्मनि प्रादुर्भावे च ।
८६० कस गतौ । वृत् । कुचादय उदात्ता उदात्तेतः परस्मैभाषाः । रुहिस्त्वनुदात्तेतः । ज्वलादिर्गतः । अथ गुहूत्यन्ताः स्वरितेतः ।
८६१ हिक्क अव्यक्ते शब्दे ।
८६२ अञ्चु गतौ याचने च । अचु इत्येके । अचि इत्यपरे ।
८६३ टुयाचृ याच्ञायाम् ।
८६४ रेट्ट परिभाषणे ।

८५४ विशरणम्—अवयवविभागः ।
८५५ शातनम्—पीडनम् ।
८५६ आह्वानम्—सम्बोधनम् ।
८५९ बीजजन्म—बीजोत्पत्तिः । प्रादुर्भावः—अतिक्रान्तोत्पत्तिः ।
८६४ परिभाषणम्—इवरवः ।

८६५ चते-
८६६ चदे याचने ।
८६७ प्रोथृ पर्याप्तौ ।
८६८ मिद-
८६९ मेद मेधाहिंसनयोः । था-
न्ताविमाविति स्वामी ।
धान्ताविति न्यासः ।
८७० मेधृ सङ्गमे च ।
८७१ णिद-
८७२ णेद कुत्सासन्निकर्षयोः ।
८७३ श्रुधु-
८७४ मृधु उन्दने ।
८७५ बुधिर् बोधने ।
८७६ उवुन्दिर् निशामने ।
८७७ वेणृ गतिज्ञानचिन्तानि-
शामनवादित्रग्रहणेषु ।
नान्तोऽप्ययम् ।
८७८ खनु अवदारणे ।
८७९ चीवृ आदानसंवरणयोः ।
८८० चायृ पूजानिशामनयोः ।
८८१ व्यय गतौ
८८२ दाप्ऋ दाने ।
८८३ भेषृ भये । गतावित्येके ।
८८४ श्रेषृ-

८८५ श्लेषृ गतौ ।
८८६ अस गतिदीप्त्यादानेषु ।
अष इत्येके ।
८८७ स्पश बाधनस्पर्शनयोः ।
८८८ लष कान्तौ ।
८८९ चष भक्षणे ।
८९० छष हिंसायाम् ।
८९१ झष आदानसंवरणयोः ।
८९२ भ्रक्ष-
८९३ भ्लक्ष अदने ।
( भक्ष इति मैत्रेयः ) ।
८९४ दासृ दाने ।
८९५ माहृ माने ।
८९६ गुहू संवरणे । हिकादय
उदात्ताः स्वरितेत उभ-
यतोभाषाः ।
अथाजन्ता उभयपदिनः ।
८९७ श्रिञ् सेवायाम् । उदात्त
उभयतो भाषः ।
८९८ भृञ् भरणे ।
८९९ हृञ् हरणे ।
९०० धृञ् धारणे ।
९०१ णीञ् प्रापणे । भृञादय-
श्चत्वारोऽनुदात्ता उभय-
तो भाषाः । अथ अजन्ताः
परस्मैपदिनः ।

८६७ पर्याप्तिः—पूर्णता ।
८७१ कुत्सा—निन्दा-सन्निकर्षः-सामीप्यम् ।
८७३ उन्दनम्—क्लेदनम् ।
८७६ निशामनम्—चाक्षुषज्ञानम् ।
८७८ अवदारणम्—खननम् ।
८७९ आदानम्-ग्रहणम् संवरणम्-स्वीकारः ।
८८७ स्पर्शनम्—ग्रथनम् ।
८९८ भरणम्—पोषणम् ।
८९९ हरणम्—प्रापणम्, स्वीकारः, स्तेयम्,
नाशनञ्च ।

९०२ धेट् पाने ।
९०३ ग्लै-
९०४ म्लै हर्षक्षये ।
९०५ ष्ठै न्यक्करणे ।
९०६ ष्वै स्वप्ने ।
९०७ ध्मै तृप्तौ ।
९०८ ध्यै चिन्तायाम् ।
९०९ रै शब्दे ।
९१० स्त्यै-
९११ ष्ट्यै शब्दसङ्घातयोः ।
९१२ खै खदने ।
९१३ क्षै-
९१४ जै-
९१५ वै क्षये ।
९१६ कै-
९१७ गै शब्दे ।
९१८ शै-
९१९ श्रै पाके । स्नै इति केषु-चित्पाठः ।
९२० पै-
९२१ ओवै शोषणे ।
९२२ ष्टै-
९२३ ष्णै वेष्टने । शोभायां चेत्येके ।
९२४ दैप् शोधने
९२५ पा पाने ।

९०३ हर्षक्षयः—धातुक्षयः ।
९०५ न्यक्करणम्—तिरस्कारः ।

९२६ घ्रा गन्धोपादाने ।
९२७ ध्मा शब्दाग्निसंयोगयोः ।
९२८ ष्ठा गतिनिवृत्तौ ।
९२९ म्ना अभ्यासे ।
९३० दाण् दाने ।
९३१ ह्रृ कौटिल्ये ।
९३२ स्वृ शब्दोपतापयोः ।
९३३ स्मृ चिन्तायाम् ।
९३४ ह्रृ संवरणे ।
९३५ सृ गतौ ।
९३६ ऋ गतिप्रापणयोः ।
९३७ गृ
९३८ घृ सेचने ।
९३९ धृ हूर्च्छने ।
९४० सु गतौ ।
९४१ षु प्रसवैश्वर्ययोः ।
९४२ श्रु श्रवणे ।
९४३ ध्रु स्थैर्ये
९४४ दु-
९४५ द्रु गतौ ।
९४६ जि-
९४७ ज्रि अभिभवे । धयत्यादयोऽनुदात्ताः परस्मैभा-

९२६ गन्धोपादानम्—गन्धग्रहणम् ।
९२८ गतिनिवृत्तिः—गमनविरोधः ।
९३१ कौटिल्यम्—क्रौर्यम् ।
९३२ उपतापः—रोगः ।
९३३ चिन्ता—स्मृतिः ।
९३९ हुर्च्छनम्—कौटिल्यम् ।
९४६ अभिभवः—न्यूनीकरणं-न्यूनीभवनं च ।

षाः अथ डीङन्ता ङितः ।
९४८ ष्मिङ् ईषद्धसने ।
९४९ गुङ् अव्यक्ते शब्दे ।
९५० गाङ् गतौ ।
९५१ कुङ्-
९५२ घुङ्-
९५३ उङ्-
९५४ ङुङ् शब्दे । उङ् कुङ् खुङ् गुङ् घुङ् ङुङ् इत्यन्ये ।
९५५ च्युङ्-
९५६ ज्युङ्-
९५७ प्रुङ्-
९५८ प्लुङ् गतौ । क्लुङ् इत्येके ।
९५९ रुङ् गतिरेषणयोः ।
९६० धूङ् अवध्वंसने ।
९६१ मेङ् प्रणिदाने ।
९६२ देङ् रक्षणे ।
९६३ ईयैङ् गतौ ।
९६४ प्यैङ् वृद्धौ ।
९६५ त्रेङ् पालने । ष्मिङ्ङादयोऽनुदात्ता आत्मनेभाषाः ।
९६६ पूङ् पवने ।

९५९ रेषपम्—हिंसा ।
९६० अवध्वंसनम्—विनाशः ।
९६१ प्रणिदानम्—विनिमयः—प्रत्यर्पणं च ।
९६६ पवनम्—पवित्रीकरणम् ।

९६७ मूङ् बन्धने ।
९६८ डीङ् विहायसा गतौ । पूङादयश्चत्वार उदात्ता आत्मनेभाषाः ।
९६९ तॄ प्लवनतरणयोः । उदात्तः परस्मैभाषः । अथाधावात्मनेपदिनः ।
९७० गुप गोपने ।
९७१ तिज निशाने ।
९७२ मान पूजायाम् ।
९७३ बध बन्धने । गुपादयश्चत्वार उदात्ता अनुदात्तेत आत्मनेभाषाः ।
९७४ रभ राभस्ये ।
९७५ डुलभष् प्राप्तौ ।
९७६ ष्वञ्ज परिष्वङ्गे ।
९७७ हद पुरीषोत्सर्गे । रभादयश्चत्वार उदात्ता अनुदात्तेत आत्मनेभाषाः ।
९७८ ञिष्विदा अव्यक्ते शब्दे । उदात्त उदात्तेत् परस्मैभाषः ।

९६८ विहायसागतिः—आकाशमार्गेणगमनम् ।
९६९ प्लवनम्—प्लुतगतिः । तरणम्—प्लवनं—सन्तरणं च ।
९७० गोपनम्—रक्षणम् ।
९७१ निशानम्—तीक्ष्णीकरणम् ।
९७४ राभस्यम्—रभसक्रिया ।
९७६ परिष्वङ्गः—आलिङ्गनम् ।
९७७ पुरीषोत्सर्गः—मलत्यागः ।

९७९ स्कन्दिर् गतिशोषणयोः ।
९८० यभ मैथुने ।
९८१ णम प्रह्वत्वे शब्दे च ।
९८२ गम्लृ-
९८३ सृप्लृ गतौ ।
९८४ यम उपरमे ।
९८५ तप सन्तापे ।
९८६ त्यज हानौ ।
९८७ षञ्ज संगे ।
९८८ दृशिर् प्रेक्षणे ।
९८९ दंश दशने ।
९९० कृष विलेखने ।
९९१ दह भस्मीकरणे ।
९९२ मिह सेचने । स्कन्दादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः ।
९९३ कित निवासे रोगापनयने च । उदात्तेत् परस्मैभाषः । अथ वहत्यन्ताः स्वरितेतः ।
९९४ दान खण्डने ।
९९५ शान तेजने । उदात्तौ स्वरितेतावुभयतोभाषौ ।
९९६ डुपचष् पाके ।
९९७ षच समवाये ।
९९८ भज सेवायाम् ।
९९९ रञ्ज रागे ।
१००० शप आक्रोशे ।
१००१ त्विष दीप्तौ ।
१००२ यज देवपूजासङ्गतिकरणदानेषु ।
१००३ डुवप् बीजसन्ताने । छेदनेऽपि ।
१००४ वह प्रापणे । पचादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः । षचिस्तूदात्तः ।
१००५ वस निवासे । अनुदात्त उदात्तेत् परस्मैभाषः ।
१००६ वेञ् तन्तुसन्ताने ।
१००७ व्येञ् संवरणे ।
१००८ ह्वेञ् स्पर्धायां शब्दे च । वेञादयस्त्रयोऽनुदात्ता उभयतोभाषाः । अथ परस्मैपदिनौ ।

---

९८० मैथुनम्—सुरतकर्म ।
९८१ प्रह्वत्वम्—प्रणमनम् ।
९८४ उपरमः—निवृत्तिः ।
९८९ दशनम्—दंष्ट्राव्यापारः ।
९९० विलेखनम्—आकर्षणम् ।
९९३ रोगापनयनम्—रोगदूरीकरणम् ।
९९५ तेजनम्—निशामनम् ।
९९७ समवायः—सम्बन्धः ।
१००० आक्रोशः—विरुद्धानुध्यानम् ।
१००३ बीजवपनम्—बीजस्यक्षेत्रेविकिरणम् । अस्य धातोः छेदनमप्यर्थः ।
१००६ तन्तुसन्तानम्—वस्त्रनिर्माणम् ।
१००७ संवरणम्—स्वीकारः ।
१००८ स्पर्द्धा—अन्याभिभवेच्छा ।

१००९ वद व्यक्तायां वाचि ।
१०१० टुओश्वि गतिवृद्ध्योः । वृत् । यजादिस्समाप्तः । अयं वदतिश्चोदात्तौ परस्मैभाषौ । चुलुम्पत्यादिश्च भ्वादौ द्रष्टव्याः । तस्य आकृतिगणत्वात् । ऋतिः सौत्रश्च सजुगुप्साकृपयोः । इति श्वि करणा भ्वादयः ॥ १ ॥ ( १०१० )

## अथ अदादयः

१०११ अद भक्षणे ।
१०१२ हन हिंसागत्योः । अनुदात्तावुदात्तेतौ परस्मैपदिनौ । अथ चत्वारः स्वरितेतः ।
१०१३ द्विष अप्रीतौ ।
१०१४ दुह प्रपूरणे ।
१०१५ दिह उपचये ।
१०१६ लिह आस्वादने । द्विषादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ।
१०१७ चक्षिङ् व्यक्तायां वाचि । अयं दर्शनेऽपि । अनुदात्तोऽनुदात्तेत् आत्मनेपदी । अथ पृच्यन्ताः अनुदात्तेतो दश ।
१०१८ ईर गतौ कम्पने च ।
१०१९ ईड स्तुतौ ।
१०२० ईश ऐश्वर्ये ।
१०२१ आस उपवेशने ।
१०२२ आङः शासु इच्छायाम् ।
१०२३ वस आच्छादने ।
१०२४ कसि गतिशासनयोः । अयमनिदिति केचित् । कस इत्येके । कश इत्यपि ।
१०२५ णिसि चुम्बने ।
१०२६ णिजि शुद्धौ ।
१०२७ शिजि । अव्यक्तेशब्दे ।
१०२८ पिजि पर्णे सम्पर्चन इत्येके । उभयत्रेत्यन्ये । अवयव इत्येके । अव्यक्ते शब्दे इतीतरे । पृजि इत्येके ।

---

१००९ व्यक्तवाक्—स्फुटवचनम् ।
१०१३ अप्रतीतिः—अपकारः—( अनिष्टकरणम् ) ।
१०१४ प्रपूरणम्—प्रपूर्तिः ( दोहनम् ) ।
१०१५ उपचयः—वृद्धिः ।
१०१६ आस्वादनम्—अनुभवः ।
१०२० ऐश्वर्यम्—सम्पत्तिः ।
१०२१ उपवेशनम्—आसनग्रहणम् ।
१०२३ आच्छादनम्—आवरणम् ।
१०२४ शासनम्—निर्देशः ( दण्डः ) ।

१०२९ वृजी वर्जने । वृजि इ-
त्यन्ये ।
१०३० पृची सम्पर्चने । ईरा-
दय उदात्ता अनुदात्तेतः
आत्मनेभाषाः ।
१०३१ षूङ् प्राणिगर्भविमोचने ।
१०३२ शीङ् स्वप्ने । उदात्ता-
वात्मनेभाषौ । अथ स्तौ-
त्यन्ताः परस्मैपदिनो
दश ।
१०३३ यु मिश्रणेऽमिश्रणे च ।
१०३४ रु शब्दे । तु इति सौत्रो
धातुः-गतिवृद्धिहिंसासु ।
१०३५ णु स्तुतौ ।
१०३६ टुक्षु शब्दे ।
१०३७ क्षणु तेजने ।
१०३८ ष्णु प्रस्रवणे । युप्रभृतय
उदात्ता उदात्ततः परस्मै-
भाषाः ।
१०३९ ऊर्णुञ् आच्छादने ।
उदात्त उभयतोभाषः ।
१०४० द्यु अभिगमने ।

१०२९ वर्जनम्—त्यागः ( परिहारः )।
१०३० सम्पर्चनम्—कौटिल्यम् ।
१०३१ प्राणिगर्भविमोचने—प्रणिप्रसवः ।
१०३३ मिश्रणम्—मेलनम् । अमिश्रणम्,
अमेलनम् ।
१०३७ तेजनम्—तीक्ष्णीकरणम् ।
१०३८ प्रस्रवणम्—निस्यन्दनम् ।
१०४० अभिगमनम्—सर्वतो गमनम् ।

१०४१ षु प्रसवैश्वर्ययोः ।
१०४२ कु शब्दे ।
१०४३ ष्टुञ् स्तुतौ । द्युप्रभृ-
तयोऽनुदात्ताः परस्मै-
भाषाः । स्तौतिस्तूभ-
यतो भाषः ।
१०४४ ब्रूञ् व्यक्तायां वाचि ।
उदात्त उभयते भाषः ।
अथ शास्यन्ताः परस्मै-
पदिनः ।
१०४५ इण् गतौ ।
१०४६ इङ् अध्ययने । नित्यम-
धिपूर्वः ।
१०४७ इक् स्मरणे । अयमप्य-
धिपूर्वः ।
१०४८ वी गतिव्याप्तिप्रजनका-
न्त्यसनखादनेषु । ( ई च )।
१०४९ या प्रापणे ।
१०५० वा गतिगन्धनयोः ।
१०५१ भा दीप्तौ ।
१०५२ ष्णा शौचे ।
१०५३ श्रा पाके ।
१०५४ द्रा कुत्सायां गतौ ।
१०५५ प्सा भक्षणे ।
१०५६ पा रक्षणे ।

१०४६ अध्ययनम्—पठनम् ।
१०४७ स्मरणम्—चिन्तनम् ।
१०४८ प्रजनम्—गर्भग्रहणम् ।
१०५४ कुत्सागतिः—गर्हितगमनम् ।

१०५७ रा दाने ।
१०५८ ला आदाने । द्वावपि दाने इति चन्द्रः ।
१०५९ दाप् लवने ।
१०६० ख्या प्रकथने ।
१०६१ प्रा पूरणे ।
१०६२ मा माने ।
१०६३ वच परिभाषणे । इण्प्रभृतयो ऽनुदात्ताः परस्मैभाषाः । इङ् त्वात्मनेपदी ।
१०६४ विद ज्ञाने ।
१०६५ अस भुवि ।
१०६६ मृजू शुद्धौ ।
१०६७ रुदिर् अश्रुविमोचने । विदादय उदात्ता उदात्तेतः परस्मैभाषाः ।
१०६८ ञिष्वप् शये । अनुदात्तः परस्मैभाषः ।
१०६९ श्वस प्राणने-
१०७० अन च ।

१०७१ जक्ष-भक्षहसनयोः । वृत् ।
१०७२ जागृ निद्राक्षये ।
१०७३ दरिद्रा दुर्गतौ ।
१०७४ चकासृ दीप्तौ ।
१०७५ शासु अनुशिष्टौ । श्वसादय उदात्ता उदात्तेतः परस्मैभाषाः । अथ पञ्चधातवश्छान्दसाः ।
१०७६ दीधीङ् दीप्तिदेवनयोः ।
१०७७ वेवीङ् वेतिना तुल्ये । उदात्तावात्मनेभाषौ ।
१०७८ षस-
१०७९ षस्ति स्वप्ने ।
१०८० वश कान्तौ । षसादय उदात्ता उदात्तेतः परस्मैभाषाः ।
१०८१ चर्करीतं च ।
१०८२ ह्रुङ् अपनयने अनुदात्त आत्मनेभाषः । इति लुग्विकरणा अदादयः ॥ २ ॥ ( ७२ )

---

१०५८ आदानम्—ग्रहणम् ।
१०५९ लवनम्—छेदनम् ।
१०६३ परिभाषणम्—सर्वतः कथनम् ।
१०६७ अश्रुविमोचनम्—नेत्रजलत्यागः । ( रोदनम् ) ।
१०६८ शयः—शयनं ( निद्रा ) ।
१०६९ प्राणनं—जीवनम् ।

१०७२ निद्राक्षयः—जागरणम् ।
१०७३ दुर्गतिः—दुःखम् ।
१०७४ दीप्तिः—प्रकाशः ।
१०७५ अनुशिष्टिः—अनुशासनम् ।
१०७६ देवनम्—दुःखम् ।
१०८० कान्तिः—इच्छा ।
१०८२ अपनयनम्—दूरीकरणम् ।

## अथ जुहोत्यादयः

१०८३ डु दानादनयोः । आदाने चेत्येके । प्रीणने ऽपीति भाष्यम् ।
१०८४ ञिभी भये ।
१०८५ ह्री लज्जायाम् । जुहोत्यादयोऽनुदात्ताः परस्मैभाषाः ।
१०८६ पॄ पालनपूरणयोः । पृ इत्येके । उदात्तः परस्मैभाषः ।
१०८७ डुभृञ् धारणपोषणयोः । अनुदात्त उभयतो भाषः ।
१०८८ माङ् माने शब्दे च ।
१०८९ ओहाङ् गतौ । अनुदात्ता वात्मनेपदिनौ ।
१०९० ओहाक् त्यागे । अनुदात्तः परस्मैपदी ।
१०९१ डुदाञ् दाने ।
१०९२ डुधाञ् धारणपोषणयोः । दान इत्यप्येके । अनुदात्तावुभयतोभाषौ । अथ त्रयः स्वरितेतः ।

१०८३ दानं—वितरणम् । अदनं-भक्षणम् ।
१०८६ पूरणम्—तृप्तिः ।
१०८७ पोषणम्—पालनम् ।
१०९१ दानं—स्वस्वत्वनिवृत्तिपूर्वकपरस्वस्वोत्पादनम् ।

१०९३ णिजिर् शौचपोषणयोः ।
१०९४ विजिर् पृथग्भावे ।
१०९५ विष्लृ व्याप्तौ । णिजिरादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः । अथ आगणान्ताः एकादश परस्मैपदिनश्छान्दसाश्च ।
१०९६ घृ क्षरणदीप्त्योः ।
१०९७ हृ प्रसह्यकरणे ।
१०९८ ऋ-
१०९९ सॄ गतौ । घृप्रभृतयो ऽनुदात्ताः परस्मैभाषाः ।
११०० भस भर्त्सनदीप्त्योः । उदात्त उदात्तेत् परस्मैपदी ।
११०१ कि ज्ञाने । अनुदात्तः परस्मैपदी ।
११०२ तुर त्वरणे ।
११०३ धिष शब्दे ।
११०४ धन धान्ये ।
११०५ जन जनने । तुरादय उदात्ता उदात्तेतः परस्मैभाषाः : ( २३ )

११९४ पृथग्भावः—पृथक्करणम्
१०९५ व्याप्तिः—सम्बन्धः ।
१०९६ क्षरणं—प्रस्रवणम् ।
१०९७ प्रसह्यकरणम्—बलात्कारकरणम् ।
११०० भर्त्सनम्—अपकारः ।
११०५ जननम्—उत्पत्तिः ।

११०६ गा स्तुतौ । अनुदात्तः परस्मैभाषः । घ्रप्रभृतय एकादश च्छन्दसि । इयति भाषायामपि । इति श्लुविकरणा जुहोत्यादयः ॥ ३ ॥

## अथ दिवादयः

अथ उदात्ताः झषन्ताः परस्मैपदिनः ।

११०७ दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकान्तिगतिषु ।
११०८ षिवु तन्तुसन्ताने ।
११०९ स्रिवु गतिशोषणयोः ।
१११० ष्ठिवु निरसने । केचिदिहेमं न पठन्ति ।
११११ ष्णुसु अदने । आदान इत्येके । अदर्शन इत्यपरे ।
१११२ ष्णसु निरसने ।
१११३ क्नसु ह्वरणदीप्त्योः ।
१११४ व्युष दाहे-
१११५ प्लुष च ।
१११६ नृती गात्रविक्षेपे ।
१११७ त्रसी उद्वेगे ।
१११८ कुथ पूतीभावे ।
१११९ पुथ हिंसायाम् ।
११२० गुध परिवेष्टने ।
११२१ क्षिप प्रेरणे ।
११२२ पुष्प विकसने ।
११२३ तिम-
११२४ ष्टिम-
११२५ ष्टीम आर्द्रीभावे ।
११२६ व्रीड चोदने लज्जायाञ्च ।
११२७ इष गतौ ।
११२८ षह-
११२९ षुह चक्यर्थे ।
११३० जृष-
११३१ झृष् वयोहानौ । दिवादय उदात्ता उदात्तेतः परस्मैभाषाः । क्षिपिमत्वनुदात्तः ।
११३२ षूङ् प्राणिप्रसवे ।
११३३ दूङ् परितापे । उदात्तावात्मने भाषौ ।
११३४ दीङ् क्षये ।
११३५ डीङ् विहायसा गतौ ।

---

११०७ क्रीडा—विहार । विजिगीषा—विजयेच्छा । व्यवहारः—व्यापारः । द्युतिः—कान्तिः । मोदः—हर्षः ।
११०८ तन्तुसन्तानः—क्षेत्रे विकिरणं—गर्भाधानञ्च ।
१११० निरसनम्—द्यूतीकरणम् ।
१११३ ह्वरणं—कौटिल्यम् ।
१११६ गात्रविक्षेपः—नर्तनम् ।
१११७ उद्वेगः—त्रासः ।
१११८ पूतीभावः—दौर्गन्ध्यम् ।
११२८ चक्यर्थः—तृप्तिः ।
११३३ परितापः—दुःखम् ।

११३६ धीङ् आधारे ।
११३७ मीङ् हिंसायाम् ।
११३८ रीङ् श्रवणे ।
११३९ लीङ् श्लेषणे ।
११४० व्रीङ् वृणोत्यर्थे । वृत् । स्वादय ओदितः ।
११४१ पीङ् पाने ।
११४२ माङ् माने ।
११४३ ईङ् गतौ ।
११४४ प्रीङ् प्रीतौ । दीङादय आत्मनेपदिनोऽनुदात्ताः डीङ् तूदात्तः । अथ च त्वारः परस्मैपदिनः ।
११४५ शो तनूकरणे ।
११४६ छो छेदने ।
११४७ षो अन्तकर्मणि ।
११४८ दो अवखण्डने । श्यतिप्रभृतयोऽनुदात्ताः परस्मैभाषाः । अथ आत्मनेपदिनः पञ्चदश ।
११४९ जनी प्रादुर्भावे ।
११५० दीपी दीप्तौ ।
११५१ पूरी आप्यायने ।
११५२ तूरी गतित्वरणहिंसनयोः
११५३ धूरी-
११५४ गूरी हिंसागत्योः ।
११५५ घूरी-
११५६ जूरी हिंसावयोहान्योः ।
११५७ शूरी हिंसास्तम्भन यो
११५८ चूरी दाहे ।
११५९ तप (पत) ऐश्वर्ये वा ।
११६० वृतु वरणे । वावृतु इति केचित् ।
११६१ क्लिश उपतापे ।
११६२ काशृ दीप्तौ ।
११६३ वाशृ शब्दे । जन्यादय उदात्ता अनुदात्तेत आत्मनेभाषाः । तपिस्त्वनुदात्तः । अथ पञ्च स्वरितेतः ।
११६४ मृष तितिक्षायाम् ।
११६५ शुचिर् पूतीभावे । उदात्तौ स्वरितेतावुभयतोभाषौ ।
११६६ णह बन्धने ।
११६७ रञ्ज रागे ।
११६८ शप आक्रोशे । णहादयस्त्रयोऽनुदात्ताः स्वरितेत उभयतोभाषाः । अथ एकादश आत्मनेपदिनः ।
११६९ पद गतौ ।
११७० खिद दैन्ये ।
११७१ विद सत्तायाम् ।
११७२ बुध अवगमने ।
११७३ युध संप्रहारे ।
११७४ अनोरुध कामे ।
११७५ अण प्राणने । अन इत्येके ।

११४७ अन्तकर्म—विनाशः ।
११४८ अवखण्डनम्—छेदनम् ।
११४९ प्रादुर्भावः—अतिक्रान्तोत्पत्तिः ।
११६१ उपतापो—रोगः ।
११६४ तितिक्षा—सहनम् ।
११६८ आक्रोशः—विरूद्धानुध्यानम् ।

११७६ मन ज्ञाने ।
११७७ युज समाधौ ।
११७८ सृज विसर्गे ।
११७९ लिश अल्पीभावे । पदादयोऽनुदात्ता अनुदात्तेत आत्मनेभाषाः । अण् तूदात्तः । अथ आगणान्ताः परस्मैपदिनः अष्टषष्टिः ।
११८० राधोऽकर्मकाद्वृद्धावेव ।
११८१ व्यध ताडने ।
११८२ पुष पुष्टौ ।
११८३ शुष शोषणे ।
११८४ तुष प्रीतौ ।
११८५ दुष वैकृत्ये ।
११८६ श्लिष आलिङ्गने ।
११८७ शक विभाषितो मर्षणे । उभयपदी ।
११८८ ष्विदा गात्रप्रक्षरणे । त्रिष्विदा इत्येके ।
११८९ क्रुध क्रोधे ।
११९० क्षुध बुभुक्षायाम् ।
११९१ शुध शौचे ।
११९२ षिधु संराद्धौ । राधादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः । वेटः ।
११९३ रध हिंसासंराध्योः ।
११९४ णश अदर्शने ।
११९५ तृप् प्रीणने ।
११९६ दप हर्षमोहनयोः ।
११९७ द्रुह जिघांसायाम् ।

११९० बुभुक्षा—भोक्तुमिच्छा ।

११९८ मुह वैचित्ये ।
११९९ ष्णुह उद्गिरणे ।
१२०० स्निह प्रीतौ । वृत् । राधादयो वेटः उदात्तेतः परस्मैभाषाः ।
१२०१ शमु उपशमे ।
१२०२ तमु काङ्क्षायाम् ।
१२०३ दमु उपशमे ।
१२०४ श्रमु तपसि खेदे च ।
१२०५ भ्रमु अनवस्थाने ।
१२०६ क्षमू सहने ।
१२०७ क्लमु ग्लानौ ।
१२०८ मदी हर्षे । वृत् । शमादय उदात्ता उदात्तेतः परस्मैभाषाः । क्षमू तु वेट् ।
१२०९ अमु क्षेपणे ।
१२१० यमु प्रयत्ने ।
१२११ जमु मोक्षणे ।
१२१२ तमु उपक्षये-
१२१३ दमु च ।
१२१४ वमु स्तम्भे । भमु इति केचित् ।
१२१५ व्युष विभागे । व्युस इत्यन्ये । वुस इत्यपरे ।
१२१६ प्लुष दाहे ।
१२१७ विस प्रेरणे ।
१२१८ कुंस संश्लेषणे ।

११९७ जिघांसा—हननेच्छा ।
११९८ वैचित्यम्—अविवेकः ।
११९९ उद्गिरणम्—बहिर्निःसारणम् ।

१२१९ ञुस उत्सर्गे ।
१२२० ञुस खण्डने ।
१२२१ मसी परिणामे । समी इत्येके ।
१२२२ लुट विलोडने ।
१२२३ उच समवाये ।
१२२४ भृशु-
१२२५ भ्रंशु अधःपतने ।
१२२६ वृश वरणे ।
१२२७ कृश तनूकरणे ।
१२२८ जितृषा पिपासायाम् ।
१२२९ हृष तुष्टौ ।
१२३० रुष-
१२३१ रिष हिंसायाम् ।
१२३२ डिप क्षेपे ।
१२३३ कुप क्रोधे ।
१२३४ गुप व्याकुलत्वे ।
१२३५ युप-
१२३६ रुप-
१२३७ लुप विमोहने । ( ष्टुप समुच्छ्राये ) ।
१२३८ लुभ गार्ध्ये (गार्ध्न्ये) ।
१२३९ क्षुभ सञ्चलने ।
१२४० णभ-
१२४१ तुभ हिंसायाम् । क्षुभिनभितुभयो द्युतादौ क्वथादौ च पठ्यन्ते ।

१२२१ परिणामो—विकारः ।
१२२३ समवायः—सम्बन्धः ।
१२२८ पिपासा—पानेच्छा ।
१२३८ गार्ध्यम्—आकाङ्क्षा ।
इति दिवादयः ।

१२४२ क्ष्विदृ आर्द्रीभावे ।
१२४३ ष्विमिदा स्नेहने ।
१२४४ ष्विष्विदा स्नेहनमोचनयोः ।
१२४५ ऋधु वृद्धौ ।
१२४६ गृधु अभिकांक्षायाम् । वृत् । असुप्रभृतय उदात्तेतः परस्मैभाषाः । दिवादिराकृतिगण इति केचित् । इति श्यन्विकरणा दिवादयः ॥४॥
( १४० )

## अथ स्वादयः ।

१२४७ षुञ् अभिषवे ।
१२४८ षिञ् बन्धने ।
१२४९ शिञ् निशाने ।
१२५० डुमिञ् प्रक्षेपणे ।
१२५१ चिञ् चयने ।
१२५२ स्तृञ् आच्छादने ।
१२५३ कृञ् हिंसायाम् ।
१२५४ वृञ् वरणे ।
१२५५ धुञ् कम्पने । धूञ् इत्येके । स्वादयोऽनुदात्ता उभयतोभाषाः ।
वृञ् उदात्तः । अथ परस्मैपदिनः अष्टौ ।
१२५६ टुडु उपतापे ।
१२५७ हि गतौ वृद्धौ च ।

१२४७ अभिषवः—स्नपनं—स्नानं—पीडनं—सुरासन्धानञ्च ।
१२४९ निशानं—तीक्ष्णीकरणम् ।
१२५१ चयनं—राशीकरणम् ।

१२५८ पॄ प्रीतौ ।
१२५९ स्पृ प्रितिपालनयोः । प्रीतिचलनयोः इत्यन्ये । 'चलनं जीवनम्' इति स्वामी । स्मृ इत्येके । पृणोत्यादयस्त्रयोऽपि छान्दसा इत्याहुः ।
१२६० आप्लॄ व्याप्तौ ।
१२६१ शक्लृ शक्तौ ।
१२६२ राध-
१२६३ साध संसिद्धौ । दुनो तिप्रभृतयोऽनुदात्ताः परस्मैभाषाः । अथ द्वौ आत्मनेपदिनौ ।
१२६४ अशू व्याप्तौ सङ्घाते च ।
१२६५ ष्टिघ आस्कन्दने । अशिस्तिघी उदात्तावनुदात्तेतावात्मनेभाषौ । अथ आगणान्ताः परस्मैपदिनः षोडश ।
१२६६ तक-
१२६७ तिग गतौ च ।
१२६८ षघ हिंसायाम् ।
१२६९ ञिधृषा प्रागल्भ्ये ।
१२७० दम्भु दम्भने ।
१२७१ ऋधु वृद्धौ । तृप प्रीणने इत्येके । छन्दसि । अथ आगणान्ताश्छान्दसाः ।
१२७२ अह व्याप्तौ ।
१२७३ दघ घातने पालने च ।
१२७४ चमु भक्षणे ।
१२७५ रि-
१२७६ क्षि-
१२७७ चिरि-
१२७८ जिरि-
१२७९ दाश-
१२८० दृ हिंसायाम् । क्षिर् भाषायाम् इत्येके । ऋक्षीत्येक एवाजादिरित्येके । रेफवानित्यन्ये । वृत् । तिकादय उदात्ता उदात्तेतः परस्मैभाषाः । इति श्नुविकरणाः स्वादयः ॥ ५ ॥ ( ३४ )

## अथ तुदादयः ।

अथ षडुभयपदिनः ।
१२८१ तुद व्यथने ।
१२८२ णुद प्रेरणे ।
१२८३ दिश अतिसर्जने ।
१२८४ भ्रस्ज पाके ।
१२८५ क्षिप प्रेरणे ।
१२८६ कृष विलेखने । तुदादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः ।
१२८७ ऋषी गतौ । उदात्त उदात्तेत्परस्मैपदी । अथ चत्वार आत्मनेपदिनः ।
१२८८ जुषी प्रीतिसेवनयोः

१२६१ शक्तिः—सामर्थ्यम् ।
१२६९ प्रागल्भ्यम्—धाष्टर्यम् ।
इति स्वादयः ।

१२८१ व्यथनं—दुःखदानम् ।
१२८३ अतिसर्जनम्—दानम् ।
१२८६ विलेखनम्—आकर्षणम् ।

१२८९ आविजी भयचलनयोः ।
१२९० ओलजी
१२९१ ओलस्जी व्रीडायाम् ।
जुषादय उदात्ता अनुदात्तेत आत्मनेभाषाः । अथ परस्मैपदिनः ।
१२९२ ओव्रश्चू छेदने ।
१२९३ व्यच व्याजीकरणे ।
१२९४ उछि उञ्छे ।
१२९५ उच्छि विवासे ।
१२९६ ऋच्छ गतीन्द्रियप्रलयमूर्त्तिभावेषु ।
१२९७ मिच्छ उत्क्लेशे ।
१२९८ जर्ज-
१२९९ चर्च-
१३०० झर्झ परिभाषणभर्त्सनयोः ।
१३०१ त्वच सन्वरणे ।
१३०२ ऋच स्तुतौ ।
१३०३ उब्ज आर्जवे ।
१३०४ उज्झ उत्सर्गे ।
१३०५ लुभ विमोहने ।
१३०६ रिफ कत्थनयुद्धनिन्दाहिंसादानेषु । रिह इत्येके ।
१३०७ तृप-
१३०८ तृम्फ तृप्तौ द्वावपि फान्तावित्येके ।

१२९३ व्याजीकरणम्—छद्मकरणम् ।
१२९४ उच्छः—कणश आदानम् ।
१२९५ विवासः—समाप्तिः ।
१२९६ इन्द्रियप्रलयः—इन्द्रयविनाशः । मूर्त्तिभावः—काठिन्यम् ।
१२९७ उत्क्लेशः—पीडा ।

१३०९ तुप-
१३१० तुम्प-
१३११ तुफ-
१३१२ तुम्फ हिंसायाम् ।
१३१३ दृप-
१३१४ दृम्फ उत्क्लेशे । प्रथमोऽपि द्वितीयान्त इत्येके ।
१३१५ ऋफ-
१३१६ ऋम्फ हिंसायाम् ।
१३१७ गुफ-
१३१८ गुम्फ ग्रन्थे ।
१३१९ उभ-
१३२० उम्भ पूरणे ।
१३२१ शुभ-
१३२२ शुम्भ शोभार्थे ।
१३२३ दृभी ग्रन्थे ।
१३२४ चृती हिंसाग्रन्थनयोः ।
१३२५ विध विधाने ।
१३२६ जुड गतौ । जुन इत्येके ।
१३२७ मृड सुखने ।
१३२८ पृड च ।
१३२९ पृण प्रीणने-
१३३० वृण च ।
१३३१ मृण हिंसायाम् ।
१३३२ तुण कौटिल्ये ।
१३३३ पुण कर्मणि शुभे ।
१३३४ मुण प्रतिज्ञाने ।
१३३५ कुण शब्दोपकरणयोः ।
१३३६ शुन गतौ ।
१३३७ तुण हिंसागतिकौटिल्येषु ।

१३३८ घुण-
१३३९ घूर्ण भ्रमणे ।
१३४० क्षुर क्षेप्यक्षेपीप्त्योः ।
१३४१ क्षुर शब्दे ।
१३४२ क्षुर छेदने ।
१३४३ क्षुर संवेष्टने ।
१३४४ क्षुर विलेखने ।
१३४५ क्षुर क्षीणार्थशब्दयोः ।
१३४६ पुर अग्रगमने ।
१३४७ बृहू उद्यमने । बृह इत्यन्ये ।
१३४८ तृहु-
१३४९ स्तृहु-
१३५० तृन्हू हिंसार्थाः ।
१३५१ इष इच्छायाम् ।
१३५२ मिष स्पर्द्धायाम् ।
१३५३ किलश्वैत्यक्रीडनयोः ।
१३५४ तिल स्नेहने ।
१३५५ चिल वसने ।
१३५६ चल विलसने ।
१३५७ इल स्वप्नक्षेपणयोः ।
१३५८ विल सम्वरणे ।
१३५९ विल भेदने ।
१३६० णिल गहने ।
१३६१ हिल भावकरणे ।
१३६२ शिल-
१३६३ षिल उञ्छे ।
१३६४ मिष श्लेषणे ।
१३६५ लिख अक्षरविन्यासे ।
१३६६ कुट कौटिल्ये ।

१३६७ पुट संश्लेषणे ।
१३६८ कुच सङ्कोचने ।
१३६९ गुज शब्दे ।
१३७० गुड रक्षायाम् ।
१३७१ डिप क्षेपे ।
१३७२ छुर छेदने ।
१३७३ स्फुट विकसने ।
१३७४ मुट आक्षेपमर्दनयोः ।
१३७५ त्रुट छेदने
१३७६ तुट कलहकर्मणि ।
१३७७ चुट-
१३७८ छुट छेदने ।
१३७९ जुट बन्धने ।
१३८० कड मदे ।
१३८१ लुठ संश्लेषणयोः । ( लुट इत्येके ) । (लुड इत्यन्ये) ।
१३८२ कृड घनत्वे ।
१३८३ कुड बाल्ये ।
१३८४ पुड उत्सर्गे ।
१३८५ घुट प्रतिघाते ।
१३८६ तुड तोडने ।
१३८७ थुड-
१३८८ स्थुड सम्वरणे । खुड छुड इत्येके ।
१३८९ स्फुर-
१३९० स्फुल सञ्चलने । स्फुर स्फुरणे । स्फल सञ्चलने इत्येके । स्फर इत्यन्ये ।

१३६१ भावकरणम्—अभिप्रायसूचनम् ।

१३७६—कलहकर्म—विवादः ।
१३८२ घनत्वं—सान्द्रता ।

१३९१ स्फुड-
१३९२ चुड-
१३९३ बृड संवरणे ।
१३९४ क्रुड-
१३९५ मृड निमज्जन इत्येके । ब्रश्चादय उदात्ता उदात्तेतः परस्मैभाषाः ।
१३९६ गुरी उद्यमने । उदात्तोऽनुदात्तेदात्मनेपदी । अथ चत्वारः । परस्मैपदिनः ।
१३९७ णू स्तवने ।
१३९८ धू विधूनने । उदात्तौ परस्मैभाषौ ।
१३९९ गु पुरीषोत्सर्गे ।
१४०० ध्रु गतिस्थैर्ययोः । ध्रुव इत्येके । अनुदात्तौ परस्मैपदिनौ ।
१४०१ कुङ् शब्दे । उदात्त आत्मनेपदी । दीर्घान्त इति कैयटादयः ॥ ह्रस्वान्त इति न्यासः । वृत् । कुटादयो गताः ।
१४०२ पृङ् व्यायामे ।
१४०३ मृङ् प्राणत्यागे । अनुदात्तावात्मनेभाषौ ।
अथ परस्मैपदिनःसप्त ।
१४०४ रि-
१४०५ पि गतौ ।

१३९८ विधूनन—कम्पनम् ।
१३९९ पुरीषोत्सर्गः—मलत्यागः ।

१४०६ धि धारणे ।
१४०७ क्षि निवासगत्योः । रियत्यादयोऽनुदात्ताः परस्मैभाषाः ।
१४०८ पू प्रेरणे ।
१४०९ कृ विक्षेपे ।
१४१० गृ निगरणे । उदात्ताः परस्मैभाषाः ।
१४११ हृङ् आदरे ।
१४१२ धृङ् अवस्थाने । अनुदात्तावात्मनेभाषौ । अथ षोडश परस्मैपदिनः ।
१४१३ प्रच्छ ज्ञीप्सायाम् । वृत् । किरादयो गताः ।
१४१४ सृज विसर्गे ।
१४१५ टुमस्जो शुद्धौ ।
१४१६ रुजो भङ्गे ।
१४१७ भुजो कौटिल्ये ।
१४१८ छुप स्पर्शे ।
१४१९ रुश-
१४२० रिश हिंसायाम् ।
१४२१ लिश गतौ ।
१४२२ स्पृश संस्पर्शने ।
१४२३ विच्छ गतौ ।
१४२४ विश प्रवेशने ।
१४२५ मृश आमर्शने ।
१४२६ णुद प्रेरणे ।
१४२७ षदॢ विशरणगत्यवसादनेषु ।

१४२५ आमर्शनम्—स्पर्शः ।

१४२८ शद्ऌ शातने। पृच्छत्यादयोऽनुदात्ता उदात्तेतः परस्मैभाषाः। विच्छस्तूदात्तः अथ षट् स्वरितेतः।

१४२९ मिल सङ्गमे। उदात्तः स्वरितेदुभयतोभाषः।

१४३० मुच्ऌ मोक्षणे।

१४३१ लुप्ऌ छेदने।

१४३२ विद्ऌ लाभे।

१४३३ लिप उपदेहे।

१४३४ षिच् क्षरणे। मुचादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः। विन्दतिस्तूदात्तः।

१४३५ कृती छेदने। उदात्तउदात्तेत्परस्मैपदी।

१४३६ खिद परिघाते। अनुदात्त उदात्तेत्परस्मैपदी।

१४३७ पिश अवयवे। अयं दीपनायामाप। उदात्तउदात्तेत्परस्मैपदी। वृत्। मुचादयः तुदादयश्च वृत्ताः। इति शविकरणास्तुदादयः ॥६॥

## अथ रुधादयः।

आद्या नव स्वरितेतः।

१४३८ रुधिर् आवरणे।

१४३९ भिदिर् विदारणे।

१४४० छिदिर् द्वैधीकरणे।

१४४१ रिचिर् विरेचने।

१४४२ विचिर् पृथग्भावे।

१४४३ क्षुदिर् सम्पेषणे।

१४४४ युजिर् योगे। रुधादयोऽनुदात्ताः स्वरितेत उभयतोभाषाः।

१४४५ उच्छिदिर् दीप्तिदेवनयोः।

१४४६ उतृदिर् हिंसाऽनादरयोः। उदात्तौ स्वरितेतावुभयतोभाषौ।

१४४७ कृती वेष्टने। उदात्त उदात्तेत्परस्मैपदी।

१४४८ जिइन्धी दीप्तौ। उदात्तोऽनुदात्तेदात्मनेपदी।

१४४९ खिद दैन्ये।

१४५० विद विचारणे। अनुदात्तावनुदात्ततावात्मनेपदिनौ। अथ परस्मैपदिनः।

१४५१ शिष्ऌ विशेषणे।

१४५२ पिष्ऌ संचूर्णने।

१४५३ भञ्जो आमर्दने।

१४५४ भुज पालनाभ्यवहारयोः। शिषादयोऽनुदात्ता उदात्ततः परस्मैभाषाः।

---

१४२८ शातनम्—दुःखानुभवः।
१४३३ उपदेहो—वृद्धिः। इति तुदादयः।
१४३८—आवरणम्—अवरोधः। आच्छादनम्।

१४३९—विदारणम्—भेदनम्।
१४४१—विरेचनम्—पृथग्भावः।
१४४३—सम्पेषणम्—संचूर्णनम्।
१४४४—योगः—सम्बन्धः।
१४५४ अभ्यवहारः—भोजनम्।

१४५५ तृह-
१४५६ हिंसि हिंसायाम् ।
१४५७ उन्दी क्लेदने ।
१४५८ अञ्चू व्यक्तिमर्षणकान्तिगतिषु ।
१४५९ तञ्चु सङ्कोचने ।
१४६० ओविजी भयचलनयोः ।
१४६१ वृजी वर्जने ।
१४६२ पृची सम्पर्के । तृहादय उदात्ता उदात्तेतः परस्मैपदिनः । वृत् । इति श्नम्विकरणा रुधादयः ॥ ७ ॥

## अथ तनादयः ।

आद्याः सप्त स्वरितेतः ।
१४६३ तनु विस्तारे ।
१४६४ षणु दाने ।
१४६५ क्षणु हिंसायाम्,
१४६६ क्षिणु च ।
१४६७ ऋणु गतौ ।
१४६८ तृणु अदने ।
१४६९ घृणु दीप्तौ । तनादयउदात्ताः स्वरितेत उभयतोभाषाः ।

१४७० वनु याचने । अयं चन्द्रमते परस्मैपदी ।
१४७१ मनु अवबोधने । उदात्तावनुदात्तेतावात्मनेभाषौ ।
१४७२ डुकृञ् करणे । अनुदात्त उभयतोभाषः । वृत् । इत्युविकरणास्तनादयः ॥ ८ ॥

## अथ क्रयादयः ।

१४७३ डुक्रीञ् द्रव्यविनिमये ।
१४७४ प्रीञ् तर्पणे कान्तौ च ।
१४७५ श्रीञ् पाके ।
१४७६ मीञ् बन्धने ।
१४७७ षिञ् बन्धने ।
१४७८ स्कुञ् आप्रवणे । स्तम्भु स्तुम्भु स्कम्भु स्कुम्भु रोधन इत्येके । प्रथमतृतीयौ स्तम्भे । इति माधवः । द्वितीयो निष्कोषणे चतुर्थो धारण इत्यन्ये । चत्वार इमे परस्मैपदिनः सौत्राश्च ।
१४७९ युञ् बन्धने । क्रयादयोऽनुदात्ता उभयतोभाषाः ।
१४८० कनूञ् शब्दे ।
१४८१ द्रूञ् हिंसायाम् ।
१४८२ पूञ् पवने ।
१४८३ लूञ् छेदने ।

१४५७ छेदनम्—आर्द्रीभावः ।
१४५८ व्यक्तिः—विवेचनम् । मर्षणं—स्निग्धता ।
१४६२—सम्पर्कः—सम्बन्धः ।
इति रुधादयः ।
१४६३—विस्तारः—दैर्घ्यम् ।
१४६८—अदनम्—भक्षणम् ।

१४७१—अवबोधनम्—ज्ञानम् ।
इति तनादयः ।
१४७३—द्रव्यविनिमयः—क्रयणम् ।
१४८२—पवनम्—पवित्रीकरणम् ।

१४८४ स्तृञ् आच्छादने ।
१४८५ कॄञ् हिंसायाम् ।
१४८६ वृञ् वरणे ।
१४८७ धूञ् कम्पने ॥ कनूप्रभृतय उदात्ता उभयतोभाषाः । अथ वध्रात्यताः परस्मैपदिनः ।
१४८८ शॄ हिंसायाम्
१४८९ पॄ पालनपूरणयोः ।
१४९० वॄ वरणे । भरण इत्येके ।
१४९१ भॄ भर्त्सने । भरणेऽप्येके ।
१४९२ मॄ हिंसायाम् ।
१४९३ दॄ विदारणे ।
१४९४ जॄ वयोहानौ । झॄ इत्येके । धॄ इत्यन्ये ।
१४९५ नॄ नये
१४९६ कॄ हिंसायाम् ।
१४९७ ऋह गतौ
१४९८ गॄ शब्दे । शृणातिप्रभृतय उदात्ता उदात्तेतः परस्मैपदिनः ।
१४९९ ज्या वयोहानौ ।
१५०० री गतिरेषणयोः ।
१५०१ ली श्लेषणे ।
१५०२ व्ली वरणे ।
१५०३ प्ली गतौ । वृत् । ल्वादयो गताः । प्वादयोऽपीत्येके ।
१५०४ व्री वरणे ।
१५०५ श्री भये । भरणे इत्येके ।

१५०६ क्षीष् हिंसायाम् ।
१५०७ ज्ञा अवबोधने ।
१५०८ बन्ध बन्धने । ज्यादयोऽनुदात्तेत उदात्तेतः परस्मैभाषाः ।
१५०९ वृङ् सम्भक्तौ । उदात्त आत्मनेपदी ।
१५१० ग्रन्थ विलोचनप्रतिहर्षयोः ।
१५११ मन्थ विलोडने ।
१५१२ ग्रन्थ-
१५१३ ग्रन्थ सन्दर्भे ।
१५१४ कुन्थ संक्लेशने । संक्लेश इत्येके । कुथ इति दुर्गः ।
१५१५ मृद क्षोदे-
१५१६ मृड च । अयं सुखेऽपि ।
१५१७ गुध रोषे ।
१५१८ कुष निष्कर्षे ।
१५१९ क्षुभ सञ्चलने ।
१५२० णभ-
१५२१ तृभ हिंसायाम् ।
१५२२ क्लिशू विबाधने ।
१५२३ अश भोजने ।
१५२४ उभ्रस उच्छे ।
१५२५ इष आभीक्ष्ण्ये ।
१५२६ विष विप्रयोगे ।
१५२७ प्रुष-
१५२८ प्लुष स्नेहनसेवनपूरणेषु ।
१५२९ पुष पुष्टौ ।

१५००—रेषणं—हिंसा ।

१५१५—क्षोदः—सम्पेषणम् ।
१५२२—विबाधनम्—पीडा ।

१५३० मुष स्तेये ।
१५३१ खच भूतप्रादुर्भावे । वान्तोऽयमित्येके ।
१५३२ हेठ च । अन्थदाय उउदात्ताउदात्तेतः परस्मैभाषाः । क्ष्विदिस्तु वेट् विषस्त्वनुदात्तः ।
१५३३ ग्रह उपादाने । उदात्तः स्वरितेदुभयतोभाषः ।
इति श्नाविकरणा क्रयादयः ॥ ९ ॥

## अथ चुरादयः ।

१५३४ चुर स्तेये ।
१५३५ चिति स्मृत्याम् ।
१५३६ पत्रि सङ्कोचे ।
१५३७ स्फुडि परिहासे । स्फुटि इत्यपि ।
१५३८ लक्ष दर्शनाङ्कनयोः ।
१५३९ कुद्रि अनृतभाषणे । कुद्द इत्येके । कुडि इत्यपरे ।
१५४० लड उपसेवायाम् ।
१५४१ मिदि स्नेहने । अयमनिदितिक्षीरस्वामिकौशिकौ ।
१५४२ ओलडि उत्क्षेपणे । ओकारोधात्ववयव इत्येके । नेत्यपरे । उलडि इत्यन्ये ।
१५४३ जल अपवारणे । लज इत्येके ।
१५४४ पीड अवगाहने ।

१५३१— प्रादुर्भावः-प्राणिनोऽतिक्रान्तोत्पत्तिः इति क्रयादयः ।

१५४५ नट अवस्यन्दने ।
१५४६ अथ प्रयत्ने । प्रस्थान इत्येके ।
१५४७ बध संयमने । बन्ध इति चान्द्राः ।
१५४८ पॄ पूरणे ।
१४४९ ऊर्ज बलप्राणनयोः ।
१५५० पक्ष परिग्रहे । (चूर्ण प्रेषणे)
१५५१ वर्ण-
१५५२ चूर्ण प्रेरणे । वर्ण वर्णन इत्येके ।
१५५३ प्रथ प्रख्याने ।
१५५४ पृथ प्रक्षेपे । पथ इत्येके ।
१५५५ षम्ब सम्बन्धने ।
१५५६ शम्ब च । साम्ब इत्येके ।
१५५७ भक्ष अदने ।
१५५८ कुट्ट छेदनभर्त्सनयोः । पूरण इत्येके ।
१५५९ पुट्ट-
१५६० चुट्ट अल्पीभावे ।
१५६१ अट्ट
१५६२ षुट्ट अनादरे ।
१५६३ लुण्ट स्तेये । लुण्ठ इति केचित् ।
१५६४ शठ-
१५६५ श्वठ असंस्कारगत्योः । श्वठि इत्येके ।
१५६६ तुजि-
१५६७ पिजि हिंसाबलादाननिकेतषु । तुज पिज इति केचित् । लजि लुजि इत्येके ।

१५६८ पिस गतौ ।
१५६९ षान्त्व सामप्रयोगे ।
१५७० श्वल्क-
१५७१ वल्क परिभाषणे ।
१५७२ ष्णिह स्नेहने । स्फिट इत्येके ।
१४७३ स्मिट अनादरे । ष्मिङ् इत्येके ।
१५७४ श्लिष श्लेषणे ।
१५७५ पथि गतौ ।
१५७६ पिछ कुट्टने ।
१५७७ छदि सम्वरणे ।
१५७८ श्रण दाने ।
१५७९ तड आघाते ।
१५८० खड-
१५८१ खडि-
१५८२ कुडि भेदने ।
१५८३ कुडि रक्षणे ।
१५८४ गुडि वेष्टने । रक्षणे इत्येके । कुठि इत्यन्ये । गुठि इत्यपरे ।
१५८५ खुडि खण्डने ।
१५८६ वटि विभाजने । वडि इति केचित् । ( चडि कोपे चण्डेत्यन्ये ) ।
१५८७ मडि भूषायां हर्षे च ।
१५८८ भडि कल्याणे ।
१५८९ छद वमने ।
१५९० पुस्त-
१५९१ वुस्त आदरानादरयोः ।
१५९२ चुद संचोदने ।
१५९३ नक्क-
१५९४ धक्क नाशने ।
१५९५ चक्क-
१५९६ चुक्क व्यथने ।
१५९७ क्षल शौचकर्मणि ।
१५९८ तल प्रतिष्ठायाम् ।
१५९९ तुल उन्माने ।
१६०० दुल उत्क्षेपे ।
१६०१ पुल महत्त्वे ।
१६०२ चुल समुच्छ्राये ।
१६०३ मूल रोहणे ।
१६०४ कल-
१६०५ विल क्षेपे ।
१६०६ विल भेदने ।
१६०७ तिल स्नेहने ।
१६०८ चल भृतौ ।
१६०९ पाल रक्षणे ।
१६१० लष हिंसायाम् ।
१६११ शुल्ब माने-
१६१२ शूर्प च ।
१६१३ चुट छेदने ।
१६१४ मुट संचूर्णने ।
१६१५ पडि-
१६१६ पसि नाशने ।
१६१७ व्रज मार्गसंस्कारगत्योः ।
१६१८ शुल्क अतिस्पर्शने । अतिसर्जन इत्येके ।
१६१९ चपि गत्याम् ।
१६२० क्षपि क्षान्त्याम् ।

१६२१ छजि कृच्छ्रजीवने ।
१६२२ श्वर्त गत्याम्-
१६२३ श्वभ्र च ।
१६२४ ज्ञप ज्ञानज्ञापनमारणतोषणनिशान निशामनेषु । मिच्चेत्येके ।
१६२५ यम च परिवेषणे । चान्मित् ।
१६२६ चह परिकल्कने । चप इत्येके ।
१६२७ रह त्यागे ।
१६२८ बल प्राणने ।
१६२९ चिञ् चयने । नान्ये मितोऽहेतौ ।
१६३० घट्ट चलने ।
१६३१ मुस्त सङ्घाते ।
१६३२ खट्ट संवरणे ।
१६३३ पट्ट-
१६३४ स्फिट्ट-
१६३५ चुवि हिंसायाम् ।
१६३६ पूल सङ्घाते । पूर्ण इत्येके । पुण इत्यन्ये ।
१६३७ पुंस अभिवर्धने ।
१६३८ टकि बन्धने । व्यप क्षेपे । व्यय विप इत्येके ।
१६३९ धूस कान्तिकरणे । मूर्धन्यान्त इत्येके । तालव्यान्त इत्यन्ये ।
१६४० कीट वर्णे ।
१६४१ चूर्ण सङ्कोचने ।
१६४२ पूज पूजायाम् ।
१६४३ अर्क स्तवने । तपन इत्येके ।
१६४४ शुठ आलस्ये ।
१६४५ शुठि शोषणे ।
१६४६ जुड प्रेरणे ।
१६४७ गज-
१६४८ मार्ज शब्दार्थौ-
१६४९ मर्च च ।
१६५० घृ प्रस्रवणे । स्रावण इत्येके ।
१६५१ पचि विस्तारवचने ।
१६५२ तिज निशातने ।
१६५३ कृत संशब्दने ।
१६५४ वर्ध छेदनपूरणयोः ।
१६५५ कुवि आच्छादने । कुभि इत्येके ।
१६५६ लुवि-
१६५७ तुवि अदर्शने । अर्दन इत्येके ।
१६५८ ह्रप व्यक्तायांवाचि क्लप इत्येके । ह्रप इत्यन्ये ।
१६५९ चुटि छेदने ।
१६६० इल प्रेरणे ।
१५६१ म्रक्ष म्लेच्छने ।
१६६२ म्लेच्छ अव्यक्तायां वाचि ।
१६६३ व्रूस-
१६६४ बर्ह हिंसायाम् केचिदिह

गर्ज गर्द शब्दे गर्ध अभिकाङ्क्षायाम् इति पठन्ति ।
१६६५ गुर्द पूर्वनिकेतने ।
१६६६ जसि रक्षणे । मोक्षण इति केचित् ।
१६६७ ईड स्तुतौ ।
१६६८ जसु हिंसायाम् ।
१६६९ पिडि सङ्घाते ।
१६७० रुप रोषे । रुट इत्येके ।
१६७१ डिप क्षेपे ।
१६७२ ष्टुप समुच्छ्राये । आकुस्मादात्मनेपदिनः ।
१६७३ चित संचेतने ।
१६७४ दशि दंशने ।
१६७५ दसि दर्शनदंशनयो । दस इत्यप्येके ।
१६७६ डप-
१६७७ डिप सङ्घाते ।
१६७८ तत्रि कुटुम्बधारणे । कुटुम्बेतिधात्वन्तरमिति चान्द्रः ।
१६७९ मत्रि गुप्तपरिभाषणे ।
१६८० स्पश ग्रहणसंश्लेषणयोः ।
१६८१ तज-
१६८२ भर्त्स तर्जने ।
१६८३ वस्त-
१६८४ गन्ध अर्दने ।
१६८५ विष्क हिंसायाम् । हिष्क इत्येके ।
१६८६ निष्क परिमाणे ।
१६८७ लल ईप्सायाम् ।
१६८८ कूण सङ्कोचे ।
१६८९ तूण पूरणे ।
१६९० भ्रूण आशाविशङ्कयोः ।
१६९१ शठ श्लाघायाम् ।
१६९२ यक्ष पूजायाम् ।
१६९३ स्मय वितर्के ।
१६९४ गूर उद्यमने ।
१६९५ शम-
१६९६ लक्ष आलोचने ।
१६९७ कुत्स अवक्षेपणे ।
१६९८ त्रुट छेदने । कुट इत्येके ।
१६९९ गल स्रवणे ।
१७०० भल आभण्डने ।
१७०१ कूट आप्रदाने । अवसादन इत्येके ।
१७०२ कुट्ट प्रतापने ।
१७०३ वञ्चु प्रलम्भने ।
१७०४ वृष शक्तिबन्धने ।
१७०५ मद तृप्तियोगे ।
१७०६ दिवु परिकूजने ।
१७०७ गृ विज्ञाने ।
१७०८ विद चेतनाख्याननिवासेषु ।
१७०९ मान (मन) स्तम्भे ।
१७१० यु जुगुप्सयाम् ।
१७११ कुस्म नाम्नो वा कुत्सितस्मयने । इत्याकुस्मीयाः ।
१७१२ चर्च अध्ययने ।

१७१३ वुक्क भाषणे ।
१७१४ शब्द उपसर्गादाविष्कारे च।
१७१५ कण निमीलने ।
१७१६ जभि नाशने ।
१७१७ षूद क्षरणे ।
१७१८ जसु ताडने ।
१७१९ पश बन्धने ।
१७२० अम रोगे ।
१७२१ चट-
१७२२ स्फुट भेदने ।
१७२३ घट सङ्घाते । हन्त्यर्थाश्च ।
१७२४ दिवु मर्दने ।
१७२५ अर्ज प्रतियत्ने ।
१७२६ घुषिर् विशब्दने ।
१७२७ आङः क्रन्द सातत्ये ।
१७२८ लस शिल्पयोगे ।
१७२९ तसि-
१७३० भूष अलङ्करणे । ( घो- असने, मोक्ष आसने ) ।
१७३१ अर्ह पूजायाम् ।
१७३२ ज्ञा नियोगे ।
१७३३ भज विश्राणने ।
१७३४ श्रुधु प्रसहने ।
१७३५ यत निकारोपस्कारयोः ।
१७३६ रक-
१७३७ लग आस्वादने । रघ इत्येके । रग इत्यन्ये ।
१७३८ अञ्चु विशेषणे ।
१७३९ लिगि चित्रीकरणे ।
१७४० मुद संसर्गे ।
१७४१ त्रस धारणे । ग्रहण इत्येके । वारण इत्यन्ये ।
१७४२ उध्रस उञ्छे । उकारो- धात्ववयव इत्येके । न- इत्यन्ये ।
१७४३ मुच प्रमोचने मोदने च ।
१७४४ वस स्नेहच्छेदापहरणेषु ।
१७४५ चर संशये ।
१७४६ च्यु सहने । हसने चेत्येके । च्युस इत्येके ।
१७४७ भुवोऽवकल्कने । चिन्तन इत्येके ।
१७४८ कृपेश्च । आ स्वदः स- कर्मककात् । अतः परं स्वदिमभिव्याप्य सम्भव- त्कर्मकेभ्यएवणिच् ।
१७४९ ग्रस ग्रहणे ।
१७५० पुष धारणे ।
१७५१ दल विदारणे ।
१७५२ पट-
१७५३ पुट-
१७५४ लुट-
१७५५ तुजि-
१७५६ मिजि-
१७५७ पिजि ( लिजि )-
१७५८ लुजि-
१७५९ भजि-
१७६० लघि-

१७६१ त्रसि-
१७६२ पिसि-
१७६३ कुसि-
१७६४ दशि-
१७६५ कुशि-
१७६६ घट-
१७६७ घटि-
१७६८ वृहि-
१७६९ वर्ह-
१७७० वल्ह-
१७७१ गुप-
१७७२ धूप-
१७७३ विच्छ-
१७७४ चीव-
१७७५ पुथ-
१७७६ लोक्-
१७७७ लोचृ-
१७७८ णद्-
१७७९ कुप-
१७८० तर्क-
१७८१ वृतु-
१७८२ वृधु भाषार्थाः ।
१७८३ रुट-
१७८४ लजि-
१७८५ अजि-
१७८६ दासि-
१७८७ भृशि-
१७८८ रुशि-
१७८९ शीक-
१७९० रुसि-
१७९१ नट-
१७९२ पुटि-
१७९३ जि-
१७९४ चि ( जुचि )-
१७९५ रघि-
१७९६ लघि-
१७९७ अहि-
१७९८ रहि-
१७९९ महि च ।
१८०० लडि-
१८०१ तड-
१८०२ नल च ।
१८०३ पूरी आप्यायने ।
१८०४ रुज हिंसायाम् ।
१८०५ ष्वद आस्वादने । स्वाद इत्येके । आ धृषाद्वा । इतऊर्ध्वं धृषधातुमभिव्याप्यवैकल्पिका णिचः ।
१८०६ युज-
१८०७ पृच संयमने ।
१८०८ अर्च पूजयाम् ।
१८०९ षह मर्षणे ।
१८१० ईर क्षेपे ।
१८११ ली द्रवीकरणे ।
१८१२ वृजी वर्जने ।
१८१३ वृञ् आवरणे ।
१८१४ जॄ वयोहानौ ।
१८१५ ज्रि च ।

१८१६ रिच वियोजनसंपर्चनयोः ।
१८१७ शिष असर्वोपयोगे ।
१८१८ तप दाहे ।
१८१९ तृप तृप्तौ । सन्दीपन इत्येके ।
१८२० छृदी सन्दीपने । चृपतृप हृप सन्दीपन इत्येके ।
१८२१ दभी ग्रन्थे ( भये ) ।
१८२२ दभ सन्दर्भे ।
१८२३ श्रथ मोक्षणे । हिंसायाम् इत्यन्ये ।
१८२४ मी गतौ ।
१८२५ ग्रन्थ बन्धने ।
१८२६ शीक आमर्षणे ।
१८२७ चीक च ।
१८२८ अर्द हिंसायाम् । स्वरितेत् ।
१८२९ हिंसि हिंसायाम् ।
१८३० अर्ह पूजायाम् ।
१८३१ आङः षद पद्यर्थे ।
१८३२ शुन्ध शौचकर्मणि ।
१८३३ छदआपवारणे । स्वरितेत् ।
१८३४ जुष परितर्कणे । परितर्पण इत्यन्ये ।
१८३५ धूञ् कम्पने ।
१८३६ प्रीञ् तर्पणे ।
१८३७ ग्रन्थ-
१८३८ ग्रन्थ सन्दर्भे ।
१८३९ आप्ल् लम्भने । स्वरितेदयमित्येके ।
१८४० तनु श्रद्धोपकरणयोः । उपसर्गाच्च दैर्घ्ये । चन श्रद्धोपहननयोरित्येके ।
१८४१ वद सन्देशवचने । स्वरितेत् । अनुदात्तेदित्येके ।
१८४२ वच परिभाषणे ।
१८४३ मान पूजायाम् ।
१८४४ भू प्राप्तावात्मनेपदी । णिच्सन्नियोगेनैव आत्मनेपदमित्येके ।
१८४५ गर्ह विनिन्दने ।
१८४६ मार्ग अन्वेषणे
१८४७ कठि शोके । प्रायेण उत्पर्वः-उत्कण्ठावचनः ।
१८४८ मृजू शौचालङ्कारयोः ।
१८४९ मृष तितिक्षायाम् । स्वरितेत् ।
१८५० धृष प्रसहने । इत्याधृषीयाः । अथादन्ताः ।
१८५१ कथ वाक्यप्रबन्धे ।
१८५२ वर ईप्सायाम् ।
१८५३ गण सङ्ख्याने ।
१८५४ शठ-
१८५५ श्वठ सम्यगवभाषणे ।
१८५६ पट-
१८५७ वट ग्रन्थे ।
१८५८ रह त्यागे ।
१८५९ स्तन-

१८६० गदी देवशब्दे ।
१८६१ पत गतौ वा । अदन्त इत्येके ।
१८६२ पष अनुपसर्गात् ( गतौ )
१८६३ स्वर आक्षेपे ।
१८६४ रच प्रतियत्ने ।
१८६५ कल गतौ सङ्ख्याने च ।
१८६६ चह परिकल्कने ।
१८६७ मह पूजायाम् ।
१८६८ सार-
१८६९ कृप-
१८७० अथ दौर्बल्ये ।
१८७१ स्पृह ईप्सायाम् ।
१८७२ भाम क्रोधे ।
१८७३ सूच पैशुन्ये ।
१८७४ खेट भक्षणे । तृतीयान्त इत्येके । खेट इत्यन्ये ।
१८७५ क्षोट क्षेपे ।
१८७६ गोम उपलेपने ।
१८७७ कुमार क्रीडायाम् ।
१८७८ शील उपधारणे ।
१८७९ साम सान्त्वप्रयोगे ।
१८८० वेल कालोपदेशे । काल इति पृथग्धातुरित्येके ।
१८८१ पल्यूल लवनपवनयोः ।
१८८२ वात सुखसेवनयोः । गति-सुखसेवनैष्वित्येके ।
१८८३ गवेष मार्गणे ।
१८८४ वास उपसेवायाम् ।
१८८५ निवास आच्छादने ।
१८८६ भाज पृथक्कर्मणि ।
१८८७ समाज प्रीतिदर्शनयोः । प्रीतिसेवनयोरित्येके ।
१८८८ ऊन परिहाणे ।
१८८९ ध्वन शब्दे ।
१८९० कूट परितापे । परिदाह इत्यन्ये ।
१८९१ संकेत-
१८९२ ग्राम
१८९३ कुण-
१८९४ गुण चामन्त्रणे । चात्कूटोऽपि इति मैत्रेयः ।
१८९५ केत श्रावणे निमन्त्रणे ।
१८९६ कूट सङ्कोचनेऽपि ।
१८९७ स्तेन चौर्ये । आगर्वादात्मनेपदिनः ।
१८९८ पद गतौ ।
१८९९ गृह ग्रहणे ।
१९०० मृग अन्वेषणे ।
१९०१ कुह विस्मापने ।
१९०२ शूर-
१९०३ वीर विक्रान्तौ ।
१९०४ स्थूल परिबृंहणे ।
१९०५ अर्थ उपयाच्ञायाम् ।
१९०६ सत्र सन्तानक्रियायाम् ।
१९०७ गर्व माने । इत्यागर्वीयाः ।

१९०८ सूत्र वेष्टने ।
१९०९ मूत्र प्रस्रवणे ।
१९१० रूक्ष पारुष्ये ।
१९११ पार-
१९१२ तीर कर्मसमाप्तौ ।
१९१३ पुट संसर्गे ।
१९१४ धेक दर्शन इत्येके ।
१९१५ कत्र शैथिल्ये । कर्त इत्यप्येके ॥ 'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' (ग १८६) 'तत्करोति तदाचष्टे' (ग १८७) । 'तेनातिक्रामति' (ग १८८) । धातुरूपं च' (ग १८९) 'आख्याना त्कृतस्तदाचष्टे कृल्लुकप्रकृतिप्रत्यापत्तिः प्रकृतिवच्च कारकम्' (वा १७-६८) । 'कर्तृकरणाद्धात्वर्थे' (ग १९०) ।
१९१६ बष्क दर्शने ।
१९१७ चित्र चित्रीकरणे । कदाचिद्दर्शने ।
१९१८ अंस समाघाते ।
१९१९ वट विभाजने ।
१९२० लज प्रकाशने । वटिलजि इत्येके ।
१९२१ मिश्र सम्पर्के ।
१९२२ सङ्ग्राम युद्धे । अनुदात्तेत् ।
१९२३ स्तोम श्लाघायाम् ।
१९२४ छिद्र कर्णभेदने । करणभेदने इत्येके । कर्ण इति धात्वन्तरमित्यपरे ।
१९२५ अन्ध दृष्ट्युपघाते । उपसंहार इत्यन्ये ।
१९२६ दण्ड दण्डनिपातने ।
१९२७ अङ्क पदे लक्षणे च ।
१९२८ अङ्क च-
१९२९ सुख-
१९३० दुःख तत्क्रियायाम् ।
१९३१ रस आस्वादनस्नेहनयोः ।
१९३२ व्यय वित्तसमुत्सर्गे ।
१९३३ रूप रूपक्रियायाम् ।
१९३४ च्छेद द्वैधीकरणे ।
१९३५ छद अपवारणे ।
१९३६ लाभ प्रेरणे ।
१९३७ व्रण गात्रविचूर्णने ।
१९३८ वर्ण वर्णक्रियाविस्तारगुणवचनेषु । बहुलमेतन्निदर्शनम् इत्येके ।
१३३९ पर्ण हरितभावे ।
१९४० विष्क दर्शने ।
१९४१ क्षिप प्रेरणे ।
१९४२ वस निवासे ।
१९४३ तुत्थ आवरणे । एवं आन्दोलयति प्रेङ्खोलयति विडम्ब-

यति अवधीरयति इत्यादि। अन्ये तु दशगण पाठोबहुलमित्याहुः। तेनेह अपठिता अपि सौत्राः लौकिकाः वैदिकाऽपि द्रष्टव्याः इत्याहुः। इतरे तु नवगणीपठितेभ्योऽपि क्वचित् स्वार्थे णिज्भवति, बहुलग्रहणात् तेन रामोराज्यमचीकरत् इत्यादि सिद्धिरित्याहुः। चुरादिभ्य एव बहुलं णिजित्यन्ये॥ णिङङ्गान्निरसने। श्वेताश्वाश्वतरगालोडिताद्वरकाणामश्वतरेतकलोपश्च। पुच्छादिषु प्रादिपदिकाद्धात्वर्थइत्येव सिद्धम्।-इति स्वार्थणिजन्ताश्चुरादयः॥ १०॥